तर्कसंग्रहः

# सिद्धान्तचन्द्रोदयाख्य-
# व्याख्यासंवलितः

रैक ( रायकवाल ) लल्लुरामतनुजन्मना

जीवरामशास्त्रिणा

शोधनपुरःसरटिप्पणादिसमलंकृतश्च

अयं च

मुकुन्दजीशर्मणा

संस्कृत
3393
0060
22

मुम्बय्यां

निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः

शके १८२२ संवत् १९५७.

3393/0960 | १४६
सरकं ०२२
3393

तर्कसंग्रहः

# सिद्धान्तचन्द्रोदयाख्य-व्याख्यासंवलितः

रैक (रायकवाल) लल्लुरामतनुजनुषा
जीवरामशास्त्रिणा
शोधनपुरःसरटिप्पणादिसमलंकृतश्च

अयं च

पण्डित-ज्येष्ठाराम मुकुन्दजीशर्मणा

मुम्बय्यां

निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः

शके १८२२ संवत् १९५७.

१९०१

१४६

# विषयानुक्रमणिका.


| | | पृ. | पं. |
|---|---|---|---|
| १ | मङ्गलाचरणम् | १ | १५ |
| २ | मङ्गलाचरणे नास्तिकशंका | ३ | ९ |
| ३ | पदार्थविभागः | ४ | ६ |
| ४ | नवद्रव्यविभागः | ४ | ९ |
| ५ | तमोवादः | ४ | २२ |
| ६ | गुणविभागः | ५ | २० |
| ७ | कर्मविभागः | ६ | ११ |
| ८ | सामान्यविभागः | ६ | १७ |
| ९ | विशेषविभागः | ७ | २५ |
| १० | समवायनिरूपणम् | ८ | १२ |
| ११ | अभावनिरूपणम् | ९ | १७ |
| १२ | पृथ्वीलक्षणम् | १० | १३ |
| १३ | लक्षणलक्षणम् | १० | १६ |
| १४ | संकरस्य जातिबाधकत्वम् | ११ | १२ |
| १५ | पृथ्व्या विभागः | १३ | १९ |
| १६ | परमाणुसद्भावे प्रमाणम् | १३ | २२ |
| १७ | पार्थिवशरीरविभागः | १५ | १ |
| १८ | इन्द्रियलक्षणम् | १५ | १५ |
| १९ | पृथ्वीविषयनिरूपणम् | १६ | ५ |
| २० | जललक्षणम् | १७ | ८ |
| २१ | जलविभागः | १८ | १ |
| २२ | तेजोलक्षणम् | १८ | १५ |

| | | पृ. | पं. |
|---|---|---|---|
| २३ | सुवर्णवादः .... .... .... .... | ३० .... | १० |
| २४ | वायुलक्षणम् .... .... .... .... | २१ .... | १० |
| २५ | वायुविभागः .... .... .... .... | २२ .... | ७ |
| २६ | आकाशलक्षणम् .... .... .... .... | २४ .... | २० |
| २७ | काललक्षणम् .... .... .... .... | २६ .... | १४ |
| २८ | दिग्लक्षणम् .... .... .... .... | २७ .... | १५ |
| २९ | आत्मनिरूपणम् .... .... .... .... | २८ .... | १४ |
| ३० | ईश्वरनिरूपणम् .... .... .... .... | २८ .... | १७ |
| ३१ | जीवेश्वरविषये नैयायिक-वेदान्तिक-शून्य-वादि-नास्तिकशैव-वैष्णवादीनां विवादः | २९ .... | ५ |
| ३२ | रूपनिरूपणम् .... .... .... .... | ४४ .... | ११ |
| ३३ | रसनिरूपणम् .... .... .... .... | ४५ .... | ११ |
| ३४ | गन्धनिरूपणम् .... .... .... .... | ४६ .... | ५ |
| ३५ | पाकवादनिरूपणम् .... .... .... | ४६ .... | १५ |
| ३६ | संख्यानिरूपणम् .... .... .... | ४८ .... | १ |
| ३७ | परिमाणनिरूपणम् .... .... .... | ४९ .... | ९ |
| ३८ | पृथक्त्वनिरूपणम् .... .... .... | ५० .... | ८ |
| ३९ | संयोगनिरूपणम् .... .... .... | ५० .... | १४ |
| ४० | विभागनिरूपणम् .... .... .... | ५१ .... | २ |
| ४१ | परत्वापरत्वनिरूपणम् .... .... .... | ५१ .... | १५ |
| ४२ | गुरुत्वनिरूपणम् .... .... .... | ५२ .... | १८ |
| ४३ | द्रवत्वनिरूपणम् .... .... .... | ५२ .... | २२ |
| ४४ | स्नेहनिरूपणम् .... .... .... .... | ५३ .... | २२ |
| ४५ | शब्दनिरूपणम् .... .... .... | ५३ .... | २३ |

| | | पृ. | पं. |
|---|---|---|---|
| ४६ | बुद्धिनिरूपणम् | ५५ | ८ |
| ४७ | स्मृतिसामान्यनिरूपणम् | ५६ | ७ |
| ४८ | यथार्थानुभवनिरूपणम् | ५६ | २४ |
| ४९ | अयथार्थानुभवनिरूपणम् | ५७ | १४ |
| ५० | प्रमाणविभागः | ५८ | १९ |
| ५१ | करणनिर्वचनम् | ५९ | ३ |
| ५२ | प्रत्यक्षप्रमाणनिरूपणम् | ६२ | १७ |
| ५३ | प्रत्यक्षप्रमाविभागः | ६३ | ९ |
| ५४ | निर्विकल्पकनिरूपणम् | ६३ | ११ |
| ५५ | सविकल्पकनिरूपणम् | ६३ | १६ |
| ५६ | षड्विधसन्निकर्षः | ६४ | १० |
| ५७ | लौकिकसन्निकर्षविचारः | ६४ | १५ |
| ५८ | अलौकिकसन्निकर्षविचारः | ६६ | १९ |
| ५९ | अनुमाननिरूपणम् | ६८ | ८ |
| ६० | परामर्षविचारः | ६८ | २२ |
| ६१ | व्याप्तिनिरूपणम् | ६९ | ५ |
| ६२ | पक्षधर्मतानिरूपणम् | ७१ | २ |
| ६३ | स्वार्थानुमानम् | ७१ | ७ |
| ६४ | परार्थानुमानम् | ७२ | १८ |
| ६५ | पञ्चावयवकथनम् | ७३ | १३ |
| ६६ | लिङ्गविभागः | ७४ | २१ |
| ६७ | पक्षतानिर्वचनम् | ७७ | २० |
| ६८ | हेत्वाभासनिरूपणम् | ७८ | ९ |
| ६९ | उपमाननिरूपणम् | ८५ | १० |

| | पृ. | पं. |
|---|---|---|
| ७० शब्दनिरूपणम् | ८६ | २१ |
| ७१ शक्तिनिरूपणम् | ८७ | ४ |
| ७२ आकांक्षानिरूपणम् | ९० | ८ |
| ७३ योग्यतानिरूपणम् | ९० | २३ |
| ७४ तात्पर्यनिर्णयः | ९१ | १७ |
| ७५ वाक्यविभागः | ९२ | ४ |
| ७६ शाब्दबोधनिर्णयः | ९२ | १४ |
| ७७ विधिसामान्यनिर्णयः | ९३ | २२ |
| ७८ विधिविशेषनिर्णयः | ९४ | २० |
| ७९ प्रामाण्यवादः | ९६ | १८ |
| ८० अयथार्थानुभवविभागः | ९९ | १ |
| ८१ सुखादिनिरूपणम् | १०० | ६ |
| ८२ गुणानां साधर्म्यवैधर्म्यप्रक्रिया | १०२ | ८ |
| ८३ कर्मनिरूपणम् | १०३ | ३ |
| ८४ सामान्यनिरूपणम् | १०३ | १९ |
| ८५ विशेषनिरूपणम् | १०३ | २० |
| ८६ समवायनिरूपणम् | १०३ | २२ |
| ८७ अभावनिरूपणम् | १०४ | २१ |

र. सं. १४६

॥ श्रीगणेशाय नमः ॥

# सिद्धान्तचन्द्रोदयः ।

यं वेदाः सततं स्तुवन्ति नितरां ध्यायन्ति यं योगिनो
यः सृष्ट्यादिनिदानमुष्णकिरणेन्द्वग्नीक्षणो यः पुमान् ।
तस्मिन्शैलसुताकृतार्द्धवपुषि प्रज्ञात्मके शाश्वते
मच्चित्तं रमतां सदा भयहरे श्रीमत्परब्रह्मणि ॥ १ ॥
चिन्नामान्वयसागरे हिमरुचेर्विद्वन्मणेः श्रीगुरोः
काशीनाथशुभाभिधानलसतः कारुण्यबोधांबुधेः ।
स्वान्तःस्वान्तगतान्धकारतरणिश्रीपादपङ्केरुह-
द्वन्द्वं संकलयामि हृद्यममलं प्रत्यक्षदैवं शुभम् ॥ २ ॥
ज्ञात्वा तन्त्रमनेकं श्रीकृष्णधूर्जटिदीक्षितः ।
तर्कसंग्रहगूढार्थान्विवृणोमि यथामति ॥ ३ ॥
श्रीमद्विक्रमपट्टनाधिपमहाराजाधिराजामित-
प्रज्ञश्रीगजसिंहभूपतनयश्रीराजसिंहप्रभोः ।
सुज्ञानाय विनिर्मितोऽतिसुगमः सिद्धान्तचन्द्रोदयो
रम्यः साधु तनोतु पण्डितमनोहर्षं तरङ्गायितम् ॥ ४ ॥

ग्रन्थादौ निर्विघ्नपरिसमाप्त्यर्थमन्नंभट्टोपाध्यायः शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं नमस्कारात्मकं मङ्गलमाचरन् श्रोतृप्रवृत्तयेऽनुबन्धचतुष्टयं च प्रदर्शयन् शिष्याणाम-

---

१ उत्पत्तिस्थितिलयकारणमित्यर्थः

२ उष्णकिरणः सूर्यः इन्दुश्चन्द्रः अग्निः त एव ईक्षणानि नेत्राणि यस्य स इत्यर्थः

वधानाय चिकीर्षितग्रन्थप्रतिज्ञां च कुर्वन् शिष्याणां मङ्गलप्रवृत्तये आस्तिकमार्गप्रवृत्तये वा तन्निबध्नाति निधायेत्यादिना। तर्क्यन्ते प्रमितिविषयीक्रियन्त इति तर्काः द्रव्यादिपदार्थास्तेषां संग्रहः संक्षेपेणोद्देशलक्षणपरीक्षा यस्मिन् स क्रियत इत्यर्थः। नाममात्रेण वस्तुसंकीर्त्तनमुद्देशः यथा द्रव्यगुण इति। असाधारणधर्मो लक्षणं यथा गन्धवत्त्वं पृथिव्याः। लक्षितस्य लक्षणं संभवति न वेति विचारः परीक्षा। नन्वेतद्ग्रन्थप्रवचनावलम्बनं कीदृशप्रयोजनायेत्यत आह **सुखबोधायेति**। सुखेनानायासेन बोधाय पदार्थतत्त्वज्ञानायेत्यर्थः। तथा च त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति भाष्यसंमत्यात्रोद्देशादिकृतत्वात्पदार्थतत्त्वज्ञानं भवत्येवेति भावः। अत्रोद्देशस्य पक्षज्ञानं प्रयोजनम्। लक्षणस्य इतरभेदज्ञानमिति वक्ष्यते। परीक्षायाः लक्षणे दोषपरिहार इति मन्तव्यम्। ननु कुसुमाञ्जलिलीलावत्यादिग्रन्थाध्ययनेनापि पदार्थतत्त्वज्ञानसंभवे किमभिनवग्रन्थावलम्बनेनेत्यतआह **बालानामिति**। तथा च तेषामतिदुर्बोधत्वात् तत्र बालानां बोधो न भवतीति भावः। अत्राधीतव्याकरणकाव्यकोशोऽनधीतन्यायशास्त्रो बालः। ननु-
"आशीर्वादनमस्कारवस्तुनिर्देशभेदतः।

## श्रीगणेशाय नमः॥ निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्॥ बालानां सुखबोधाय क्रियते तर्कसंग्रहः॥ १॥

मङ्गलं त्रिविधं प्रोक्तं शास्त्रादीनां मुखादिषु" इति महदुक्तेः मङ्गलस्य ग्रन्थादावावश्यकतया तदत्राकृत्वा कथं ग्रन्थः क्रियत इत्यत आह **निधायेति**। विश्वेशं जगत्कर्त्तारं श्रीसाम्ब-

मूर्त्तिं हृदि मनसि निधाय नितरां ध्यात्वा गुरुवन्दनं च विधायेत्यर्थः । नचेश्वरमङ्गलेनैव सामञ्जस्ये गुरुवन्दनमयुक्तमिति वाच्यम्। शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन। गुरुरेव परं ब्रह्मेत्यादिवचनात् गुरोरेवौत्कृष्ट्यप्रतिपादनेन तस्यैवावश्यकत्वात् । ईश्वरमङ्गलं तु समाप्तौ दृढतरसामग्रीसंपादनाय निरीश्वरवादिमतनिराकरणाय वेति ध्येयम् । यत्रेश्वरमङ्गलमेवास्ति तत्र तस्यैव प्राधान्यं दिवाकरदीधितेरभावे दीपदीधितेश्चाक्षुषोत्पादकत्ववदिति विवेकः। इति श्लोकव्याख्या । अथ मङ्गलं न समाप्तिं प्रति कारणं कादम्बर्य्यादौ मङ्गलसत्त्वेऽपि समाप्त्यनुदयात् । नास्तिकग्रन्थे मङ्गलाभावेऽपि समाप्त्युदयादन्वयव्यतिरेकव्यभिचारादितिचेन्न । यत्सत्त्वे स्वेतरयावत्कारणसत्त्वे यत्सत्त्वमित्यस्यैवान्वयत्वेन कादम्बर्य्यादौ मङ्गलसत्त्वेऽपि कारणान्तरस्यासत्त्वकल्पनेनान्वयव्यभिचाराभावात्। नास्तिकग्रन्थे तु कार्य्यात्कारणमनुमेयमिति न्यायेनायं नास्तिकः कृतमङ्गलकः विघ्नध्वंसपूर्वकपरिसमाप्तिमत्त्वात् चैत्रवदित्यनुमानाज्जन्मान्तरीयमङ्गलसिद्धौ व्यतिरेकव्यभिचाराभावाच्च। ननु मङ्गलस्य श्रुतिबोधितकर्त्तव्यताकत्वे किं मानमिति चेन्मङ्गलं श्रुतिबोधितकर्त्तव्यताकमलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिवदित्यनुमानमेव ॥ लौकिकव्यवहारवारणायालौकिकेत्याचारविशेषणम् । यद्यप्याचारः क्रिया तथापि विषयत्वसांनिध्यात्कृतिरेव विवक्षिता उन्मत्तकृतरात्रिश्राद्धादौ हेतोः सत्त्वाद्व्यभिचारः अतः शिष्टेति । शिष्टत्वं च भक्तिश्रद्धादिभिर्वेदानुमतकर्मकर्तृत्वम्। आस्तिकाभासे व्यभिचारवारणाय भक्तीत्यादि । चैत्यवन्दनप्रवृत्तबौद्धे व्यभिचारवारणाय वेदानुमतेति। भक्तिश्च आराध्यत्वेन ज्ञानम्। श्रद्धा च फलावश्यंभावनिश्चय इति संक्षेपः । नव्यास्तु मङ्गलस्य विघ्न-

ध्वंस एव फलम् । समाप्तिस्तु प्रतिबन्धकाभावघटितकारणसमुदायादेवेत्याहुः ॥ इति मङ्गलवादः ॥ तत्रोद्देशस्यैवादौ कर्त्त-

**द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः । तत्र द्रव्याणि पृथ्व्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ॥**

व्यतया तत्पुरस्कारेण पदार्थान् विभजते[1] द्रव्येति ज्ञेयत्वादिकं पदार्थसामान्यलक्षणम्, सप्तग्रहणं स्पष्टार्थमेवमग्रेऽपि । इति पदार्थसामान्यलक्षणम् ॥ द्रव्यं विभजते **तत्रेति** तत्र सप्तपदार्थमध्य इत्यर्थः । **नवैवेति** द्रव्याणि नवैवेत्यन्वयः । द्रव्यत्वजातिमत्त्वं गुणवत्त्वं समवायिकारणत्वं वा द्रव्यसामान्यलक्षणम् । द्रव्यत्वजातौ इदं द्रव्यमिति प्रत्यक्षं द्रव्यवृत्तिर्या समवायिकारणता सा किंचिद्धर्मावच्छिन्ना कारणतात्वाद्दण्डवृत्तिकारणतावदित्यनुमानं वा मानं तादृशधर्मविधया द्रव्यत्वजातिसिद्धेः । ननु आद्यक्षणे द्रव्यस्य निर्गुणत्वेन कथं गुणवत्त्वं तल्लक्षणम्, नच तदानीं तत्र गुणः संभवति, पूर्वं घटरूपसमवायिकारणाभावात्, समानसामग्रीकत्वे तु घटगुणयोर्भेदो न स्यात्कारणभेदस्यैव कार्य्यभेदनियामकत्वादिति चेन्नैवम् । गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात् । एकं रूपं रसात्पृथगिति प्रतीतिस्तु न समवायेन रूपे पृथक्त्वमेकत्वं चावगाहते गुणे गुणानङ्गीकारात्, किन्तु घटनिष्ठ एव ते सामानाधिकरण्यसंबन्धेन अतस्तत्र नातिव्याप्तिरिति मन्तव्यम् । नवत्वमेव व्युत्पादयति ॥ **पृथिवीति** ॥ अथ तमोवादः ॥ ननु नीलं तमश्चलतीति प्रतीते-

---

१ विपूर्वकभजधात्वर्थस्तु स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकबोधनानुकूलो व्यापारः ।

स्तमसो गुणक्रियावत्त्वेन द्रव्यत्वं सिद्ध्यति स्पर्शरहितत्वे सति रूपवत्त्वेन न पृथिव्यादावन्तर्भावोऽपि तस्य। तदुक्तम्।

"तमः खलु चलं नीलं परापरविभागवत्।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति" इति

अतः कथं नवैवेति चेन्न, तस्य द्रव्यत्वे आलोकासहकृतेनैव चक्षुरिन्द्रियेण ग्रहणं स्यात् । द्रव्यचाक्षुषप्रत्यक्षे ऐन्द्रियकालोकसहकृतचक्षुरिन्द्रियस्य कारणत्वात्। घूकादीनामालोकमन्तरेण कथं चाक्षुषमिति चेन्न, अदृष्टविशेषोपगृहीतघूकादीन्द्रियस्यानुत्कृष्टालोक एव सहकारीति कल्पनात्। विलक्षणादृष्टवशात्क्वचिदुत्कृष्टालोकस्यापि सहकारीति कल्पनात्, यद्वास्मदीयत्वेन द्रव्यचाक्षुषविशेषणात् । नच पृष्ठावच्छेदेनालोकसंयोगसत्त्वेऽग्रावच्छेदेन कुतो न घटादिचाक्षुषमिति वाच्यम्, आलोकसंयोगावच्छिन्नचक्षुःसंयोग एव चाक्षुषनिदानमित्येतदभिप्रायात्। किंचातिरिक्ततमःकल्पने तत्प्रागभावादिकल्पने च गौरवात्॥ तस्मात्प्रौढप्रकाशकतेजःसामान्याभाव एव तमः। यत्किंचित्तेजोऽभाववति तमआपत्त्या सामान्यपदम्। सुवर्णवति देशेऽन्धकाराभावापत्त्या प्रकाशकपदम्।त्र्यणुकादिमत्यन्धकाराभावापत्त्या प्रौढपदम्। नीलं तमश्चलतीति प्रतीतिस्तु भ्रमः। उष्णस्पर्शस्यापलपितुमशक्यत्वात्तमोऽभावो न तेज इति बोध्यम्। इति द्रव्यसामान्यनिरूपणम्। गुणं विभजते। रूपेति।

**रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः॥**

तत्रेत्यनुवर्त्तते गुणत्वजातौ मानं पूर्ववत् । अत्रादौ गुणाग्रहणकरणे इच्छैव नियामिकेति ज्ञेयम्। द्रव्यकर्मभिन्नत्वे सति सा-

मान्यवान्गुणः । द्रव्यकर्मणोरतिव्याप्तिवारणाय विशेषणदलम्, सामान्यादावतिव्याप्तिवारणाय विशेष्यदलम्,। चतुर्विंशतिगुणा इति ।"रूपरसगन्धस्पर्शाः संख्यापरिमाणे पृथक्त्वं संयोगविभागौ परत्वापरत्वबुद्धयः सुखदुःखेच्छाद्वेषप्रयत्नाश्चेति" वैशेषिकसूत्रस्थचकारस्या[1]नुक्तसमुच्चायकत्वान्न सूत्रविरोध इति बोध्यम्।लघुत्वस्य गुरुत्वाभावरूपत्वात्, आलस्यस्य कृत्याऽभावरूपत्वान्न चतुर्विंशतित्वव्याघातः।इति गुणसामान्यनि-

**उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चकर्माणि॥ परमपरं चेति द्विविधं सामान्यम्॥नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।समवायस्त्वेक एव॥**

रूपणम्। कर्म विभजते। उत्क्षेपणेति। कर्मत्वजातिस्तु प्रत्यक्षसिद्धा संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । संयोगभिन्नत्वं घटपटादावप्यस्त्यत उक्तं संयोगासमवायिकारणमिति ॥ कायपुस्तकसंयोगस्यासमवायिकारणं हस्तपुस्तकसंयोगस्तत्रातिव्याप्तिवारणाय सत्यन्तम् । भ्रमणादीनां गमनेऽन्तर्भावं वदिष्यति अतो न पञ्चविरोधः । इति कर्मसामान्यनिरूपणम्।सामान्यं विभजते।परमिति।परसामान्यमपरसामान्यमित्यर्थः।परत्वं चाधिकदेशवृत्तित्वम्।तथाहि।द्रव्यादित्रिकं सदित्युच्यते सतो भावः सत्तेति व्युत्पत्तेः तत्र सत्ता नाम काचन जातिरस्ति सा च द्रव्यत्वाधिकरणद्रव्ये वर्त्तमाना सत्यधिकदेशगुणादावपि वर्त्तते अतः सा परसामान्यमित्युच्यते। अपरत्वं च

---

१ अत्र प्रशस्तपादादिभिरित्थं प्रतिपादितम् । चकारो गुरुत्वादीन् अवशिष्टान् सप्तगुणान् समुच्चिनोतीति चतुर्विंशतिर्गुणा भवन्ति इति ।

न्यूनदेशवृत्तित्वं, वर्त्तते च द्रव्यत्वे गुणादिसाधारणसत्ताधिकरणगुणादेर्न्यूनदेशो द्रव्यं तद्वृत्तित्वम् । अथैवं सति द्रव्यत्वस्य पृथिवीत्वापेक्षया परत्वात्परं सत्तेति वक्ष्यमाणग्रन्थासंगतिरिति चेन्न, तस्याः सकलजात्यपेक्षया परत्वाभिप्रायकत्वात्।सामान्यत्वादिकं न जातिः किंतूपाधिः।यद्यपि धर्ममात्रमुपाधिरित्युच्यते तथापि जातिभिन्नो धर्ममात्रमुपाधिः । ननु उपाधिरिति को व्यवह्रियते, इति चेच्छृणु, जातिभिन्नधर्ममात्रमुपाधिर्विवक्षितः परंतु विशेषत उपाधिर्द्विविधः सखण्डोपाधिरखण्डोपाधिश्च सखण्डोपाधिस्तु बहुपदार्थघटितो धर्मः स च धर्मः क्लृप्तपदार्थान्तर्भूतः यथा मङ्गलानुमाने उक्तशिष्टत्वादिकं वक्ष्यमाणभावत्वाभावत्वशरीरत्वेन्द्रियत्वविषयत्वकारणत्वाकाशत्वकालत्वदिक्त्वादयश्च । अखण्डोपाधिश्चानिर्वचनीयो धर्मः स चातिरिक्तधर्म एवेति ।मूलकारोक्तसामान्यादिलक्षणं प्रसंगादत्रैव प्रकाश्यते। नित्यमेकमनेकानुगतं सामान्यम् । सामान्यलक्षणे एकत्वमापाततः नच तल्लक्षणं संभवति घटत्वपटत्वाद्यनेकेषु एकत्वाभावात् । अनेकत्वस्यैकभिन्नत्वात्मकत्वेनैकत्वानेकत्वयोर्विरोधात् । यद्वा तदपि लक्षणं तच्च सजातीयधर्मान्तरराहित्यरूपं स्वरूपं तथा सति घटत्वादेः सजातीयघटत्वादिरूपधर्मान्तरराहित्यान्नोक्तानुपपत्तिः । यद्वा जलपरमाण्वादिनिष्ठं यद्रूपं तत्रातिव्याप्तिवारणायैकत्वमुपात्तम्। अथवा एकमिति स्वरूपकथनं न तु लक्षणमनेकानुगतत्वं चानेकवृत्तित्वं तच्च समवायेन बोध्यम्, तेनात्यन्ताभावे नातिव्याप्तिः तस्याभावीयदैशिकविशेषणतासंबन्धेन वृत्तेः । संयोगादावतिव्याप्तिवारणाय नित्यमिति ।परमाणुपरिमाणादावतिव्याप्तिवारणायानेकेति ।**इति सामान्यनिरूपणम्**। विशेषं विभजते ।नित्येति

स्वतो व्यावर्त्तकत्वं विशेषत्वं विशेषः द्रव्याद्भिन्नः विशेषादित्यत्र स्वयमेव व्यावर्त्तको भवतीति लक्षणसमन्वयः।व्यावर्त्तकत्वं नाम व्यावृत्तिजनकत्वं व्यावृत्तिश्चेतरभेदस्तज्ज्ञानं चेदमत्रैव स्फुटतरम् । ननु विशेष एव किमर्थमाश्रयितव्य, इति चेच्छृणु, घटादीनां कपालसमवेतत्वादिकं पटादिभेदकमस्ति परमाणूनां तु परस्परभेदकं न किंचिदस्त्यतोऽगत्या विशेष आश्रयितव्य एवं शब्दसमवायिकारणतावच्छेदकतयाऽपि विशेषः सिद्ध्यति । अत्रानुमानं पूर्ववत्कारणतात्वलिङ्गकम्। नच तत्र कवत्वादिकमवच्छेदकम्भवितुमर्हति,तस्यासर्वकालीनत्वादनन्तत्वाच्च । आकाशत्वं शब्दसमवायिकारणत्वं स्वतो व्यावृत्त्यर्थमेवासावङ्गीकार्यः नित्यद्रव्यवृत्तय इति आश्रयकथनम् । इति विशेषनिरूपणम्। समवायस्यैकविधत्वादाह समवायस्त्विति नित्यः संबन्धः समवायः संयोगवारणाय नित्य इति गगनादिवारणाय संबन्ध इति संबन्धश्च संबन्धिभिन्नत्वे सति संबन्ध्याश्रितः भवति घटघटत्वयोः समवायः स्वसंभिन्नं यत्संबन्धि घटो घटत्वं च तदाश्रितः स्वभिन्नसंबन्ध्याश्रितः स्वभिन्नप्रतियोगिकः संबन्धव्यवहारहेतुर्वा। अभावाद्यात्मकस्वरूपसंबन्धादिवारणाय स्वभिन्नेति स्वरूपसंबन्धपरंपरासंबन्धव्यवहारस्य गौणत्वेन तत्र संबन्धलक्षणस्यानपेक्षितत्वात्। संयोगसमवायावेव मुख्यसंबन्धौ । ननु समवायसद्भावे किं मानमिति चेदत्र प्राञ्चः इह कपाले घटसमवाय इति प्रत्यक्षमेवेति जगदुः । नव्यास्तु भूतलं घटसंयुक्तमितिवद्गगनं घटसंयुक्तमिति प्रत्यक्षानुदयात्संबन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वेन समवायो न प्रत्यक्षः तस्यातीन्द्रियसाधारणत्वात् किंत्वनुमेयः, तथाहि यद्यद्विशिष्टज्ञानं तत्तत्किंचित्प्रकारकं किंचिद्विशेष्यकं किंचि-

त्संसर्गकं चेति सर्वजनप्रसिद्धं एवं सति रूपवान् घट इति विशिष्टज्ञानं विशेषणविशेष्योभयसंबन्धविषयकं विशिष्टज्ञानत्वात् दण्डी पुरुष इति विशिष्टज्ञानवदित्यनुमानात् द्रव्ययोरेव संयोग इति नियमेन संयोगादीनां बाधात्समवायसिद्धिरित्याहुः। प्रकारत्वं नाम विषयताविशेषः एवं विशेष्यत्वमपि प्रकारत्वं नाम भासमानवैशिष्ट्यप्रतियोगित्वं विशेष्यत्वं नाम भासमानवैशिष्ट्यानुयोगित्वं वैशिष्ट्यं नाम संबन्धः दण्डीति ज्ञाने भासमानवैशिष्ट्यं संयोगस्तत्प्रतियोगित्वं दण्डे तदनुयोगित्वं पुरुषे इत्याहुः। अत्र मीमांसकाः, समवायस्थाने स्वरूपसंबन्ध एव निवेशित इत्याहुः, तदसत् रूपाद्यात्मकानन्तस्वरूपसम्बन्धत्वकल्पने गौरवात्। नच समवायस्यैकत्वे रूपवा-

**अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ॥**

न् वायुरिति प्रतीत्यापत्तिः रूपसमवायस्य स्पर्शसमवायस्य चैक्यादिति वाच्यम्, रूपविशिष्टसमवायाधिकरणतायास्तादृशप्रतीतिनियामिकाया वायावसत्त्वात्। इति समवायनिरूपणम् अभावं विभजते अभाव इति। भावभिन्नत्वमभावत्वम्। प्रतियोगिज्ञानाधीनज्ञानविषयत्वं वाऽभावत्वम्। अखण्डोपाधिरित्यपि केचित्। भावत्वं च समवायैकार्थसमवायान्यतरसंबन्धेन सत्तावत्त्वं तदर्थश्च समवायसंबन्धेन द्रव्यादित्रिके समवायसंबन्धेन यदेकाधिकरणवृत्तित्वं तेन संबन्धेन सामान्यादित्रिके सत्तावत्त्वम्। अखण्डोपाधिरित्यपि केचित्। अत्र गुरवः, अभावोऽधिकरणात्मक इत्यूचुस्तन्न, जलगतगन्धाभावस्य जलस्वरूपतया गन्धाभावस्य घ्राणजानुपपत्तेः, जलस्य घ्राणजायोगादिति दिक्। एवमाधाराधेयभावोप्युपपद्यते। इति अभावसामान्यनिरूपणम्।

अथ पदार्थानां साधर्म्यवैधर्म्ये निरूप्येते सप्तानां ज्ञेयत्वादिकं साधर्म्यं तच्च प्रागुक्तमेव द्रव्यादिषण्णां भावत्वं द्रव्यादिपञ्चानां भावत्वे सत्यनेकत्वं समवायसंबन्धेन संबन्धित्वं वा द्रव्यादिचतुर्णां समवेतत्वम् द्रव्यादित्रयाणां सत्तावत्त्वं द्रव्यगुणयोर्नित्यानित्योभयवृत्तिसत्ताभिन्नजातिमत्त्वं कर्माऽवृत्तिजातिमत्त्वं वा गुणकर्मणोरसमवायिकारणत्वं गुणादिषण्णां गुणशून्यत्वं कर्मशून्यत्वं च । सामान्यादिचतुष्टयस्य सामान्यशून्यत्वं च येषां यत्साधर्म्यं तदितरेषां केवलान्वयिभिन्नवैधर्म्यमिति ध्येयम् ।**इति श्रीसिद्धान्तचन्द्रोदये तर्कसंग्रहव्याख्याने पदार्थोद्देशविभागनिरूपणं नाम प्रथमःपरिच्छेदः॥**

## ॥ तत्र गन्धवती पृथ्वी ॥

पदार्थान्विभज्य संप्रति तेषामुद्देशक्रमानुसारेण लक्षणं वक्तुमुपक्रमते **गन्धवतीति** । गन्धवत्त्वं[१] समवायेन बोध्यं तेन कालिकसंबन्धेन काले दैशिकसंबन्धेन दिशि गन्धवत्त्वस्य सत्त्वेऽपि न क्षतिः तयोस्तेन तेन संबन्धेनैव सर्वाधारत्वात् । अथ तदेव हि लक्षणं यदव्याप्त्यतिव्याप्त्यसं-

---

१ गन्धो विद्यतेऽस्या इति गन्धवती तस्या भावो गन्धवत्त्वम्। गन्धवत्त्वं च गन्ध एव । मतुबन्ताद्विहितो भावप्रत्ययः प्रकृतिं गमयतीति सिद्धान्तात् । गन्धः आधेयः अधिकरणं पृथ्वी आधेयता गन्धनिष्ठा अधिकरणता पृथ्वीनिष्ठा तथा च गन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं पृथ्व्या लक्षणम् । लक्ष्या पृथ्वी लक्ष्यता पृथ्व्यां लक्ष्यतावच्छेदकं पृथ्वीत्वं लक्ष्यतावच्छेदकावच्छिन्ना पृथ्वी तस्यां पृथ्व्यां गन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं वर्त्तत इति कृत्वा लक्ष्यायां पृथ्व्यां लक्षणसमन्वयः ॥

भवदोषत्रयशून्यम् । यथा गोः सास्नादिमत्त्वम् । अव्याप्तिश्च लक्ष्यैकदेशावृत्तित्वम् । अत एव गोर्न कपिलत्वं लक्षणं तस्याव्याप्तिग्रस्तत्वात् । अतिव्याप्तिश्च लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वम् । अत एव गोर्न शृंगित्वं लक्षणं तस्यातिव्याप्तिग्रस्तत्वात् । असंभवश्च लक्ष्यमात्रावृत्तित्वमत एव गोर्नैकशफवत्त्वं लक्षणं तस्यासंभवग्रस्तत्वात् । एवं गन्धवत्त्वस्यापि लक्ष्यैकदेशपाषाणमणिमुक्ताहीरकादौ अवृत्तित्वरूपाव्याप्तिग्रस्तत्वात्कथं तल्लक्षणमिति चेन्न, तद्भस्मनि गन्धोपलम्भेन तत्रापि गन्धकल्पनात्, तस्यानुद्भूतत्वादनुपलब्धिः अनुद्भूतत्वं जातिस्तदभाव उद्भूतत्वमिति गङ्गेशोपाध्यायः । उद्भूतत्वं जातिस्तदभावोऽनुद्भूतत्वमिति जरन्नैयायिकाः । तदुभयमपि संकरस्य जातिबाधकत्वपक्षे न साधीयः शुक्लत्वादिना संकरात् । तथाहि संकरश्च परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः । अनुद्भूतत्वमपहाय शुक्लत्वमुद्भूतशुक्लेऽस्ति शुक्लत्वमपहायानुद्भूतत्वमनुद्भूतगन्धेऽस्ति तदुभयमप्यनुद्भूतशुक्ले इति इत्थमुद्भूतत्वस्यापि । तदुक्तम् । "व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः ।

रूपहानिरसंबन्धो जातिबाधकसंग्रहः" इति

तस्मादनुद्भूतत्वं शुक्लत्वादिव्याप्यो धर्म्मः । उद्भूतत्वं च प्रत्यक्षयोग्यरूपरसगन्धस्पर्शसंयोगाद्यन्यतमत्वमित्यलमप्रस्तुतविचारेण । अथैवमपि सुरभ्यसुरभिकपालजन्यघटे परस्परप्रतिबन्धेन गन्धानुत्पत्तेरव्याप्तिः, नच तादृशघटे गन्धप्रतीतेश्चित्रगन्ध एवास्त्विति वाच्यम्, अवयवगन्धस्यैव तत्र भानांगीकारादिति चेन्न, गन्धवत्त्वसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात् । जलादावतिव्याप्तिवारणाय गन्धवत्त्वेति सत्तामादाय तत्रैवातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति पृथ्वी-

जलान्यतरत्वमादाय जले दोषवारणाय जातिपदम् । एतेनाद्य-क्षणोत्पन्नघटेऽव्याप्तिः परास्ता घटत्वमादायाव्याप्तिवारणाय द्रव्यत्वसाक्षाद्व्याप्येति गन्धप्रतीतिसत्त्वे पृथिवीसंबन्धसत्त्वम् पृथिवीसंबन्धाभावे गन्धप्रतीत्यभाव इत्यन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव जले प्रतीतिर्बोध्या एवं वायावपि। ननु देशा-न्तरस्थकस्तूरीकुसुमसंबद्धपवनस्यैतद्देशे तत्संबन्धाभावाद्गन्धप्र-तीत्यनुपपत्तिः, नच वाय्वानीतत्र्यणुकादिसबंधोऽस्त्येवेति वा-च्यम्, कस्तूर्या न्यूनतापत्तेः कुसुमस्य च छिद्रत्वापत्तेरितिचेन्न,

**सा द्विविधा। नित्याऽनित्या च। नित्या पर-माणुरूपा अनित्या कार्यरूपा ॥**

भोक्तृदृष्टविशेषेण पूर्ववत् त्र्यणुकान्तराद्युत्पत्तेः। कर्पूरादावदृष्ट-विशेषाभावान्न्यूनतेष्टैव। इतिपृथिवीलक्षणम्। ननु लक्षणस्य किं लक्षणमिति चेल्लक्ष्यतावच्छेदकसमनियतत्वमित्यवेहि। अत्र पृ-थिवीलक्ष्या तद्वृत्तिलक्ष्यताया अवच्छेदकं पृथिवीत्वं तत्सम-नियतत्वस्य गन्धे वृत्तेर्लक्षणसमन्वयः । अवच्छेदकत्वं च स्वरूपसंबन्धविशेषः। अन्यूनानतिरिक्तवृत्तित्वमित्यपि केचि-त्। तत्समनियतत्वं च तद्व्याप्यत्वे सति तद्व्यापकत्वं वर्त्तते च गन्धवत्त्वे यत्र गन्धवत्त्वं तत्र पृथिवीत्वमिति तद्व्याप्यत्वं यत्र पृथिवीत्वं तत्र गन्धवत्वमिति तद्व्यापकत्वम्। यस्य प्रथममुपा-दानं तद्व्याप्यमिति मन्तव्यम्। तदुक्तम् ।

"व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्।
एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः"

इति

ननु लक्षणस्य किं प्रयोजनमिति चेत्तदितरभेदानुमिति-रिति विद्धि। नन्वेवं सतीतरभेदात्मिका या व्यावृत्तिस्तस्या

अपि पृथिव्यसाधारणधर्मत्वेन सापि लक्षणमिति? वक्तव्यम्। एवं सति पृथिवीतरभेदवतीतरभेदादित्यनुमानासंभवेन तस्याः प्रयोजनाप्रसिद्धेः। एवं जगदितरस्यैवाप्रसिद्ध्या तल्लक्षणीभूतज्ञेयत्वस्यापीति चेत्सत्यम्, असाधारणधर्मो द्विविधः। व्यावर्त्तकोऽव्यावर्त्तकश्च। तत्र व्यावर्त्तकरूपासाधारणधर्मस्यैव लक्षणत्वात्। तस्य च व्यावृत्तिरूपप्रयोजनदर्शनात्। अथैवं सति लक्षणलक्षणस्याव्यावर्त्तकेऽतिव्याप्तिः। व्यावृत्तेः पृथिवीत्वसमनियतत्वात् ज्ञेयत्वस्य च पदार्थत्वसमनियतत्वादिति चेन्मैवम्। तद्भिन्नत्वस्यापि लक्षणे निवेशात्। तथाच लक्ष्यतावच्छेदकसमनियतत्वे सति ज्ञेयत्वादिभिन्नत्वं लक्षणलक्षणमिति पर्य्यवसन्नम्। स्वस्मिन्स्वभेदानङ्गीकारेण ज्ञेयत्वादौ ज्ञेयत्वादिभिन्नत्वस्यासंभवात्। यदि चासाधारणधर्ममात्रं लक्षणमितिसिद्धान्तव्याघातः एवं ज्ञेयत्वादिकं पदार्थसामान्यलक्षणमिति पूर्वोक्तमप्यसंगतमित्युच्यते, तदास्त्वसाधारणधर्ममात्रं लक्षणम्। तस्य च व्यावृत्तिवदियं पृथिवीदं जगदिति व्यवहारोऽपि प्रयोजनमिति मन्तव्यम्। तदुक्तम्, "व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति" इतः परं प्रयोजनाभावाज्ज्ञेयत्वादिभिन्नत्वमनुपादेयमेव। इति लक्षणलक्षणनिरूपणम्। पृथिवीं विभजते **सेति**। द्वैविध्यं व्युत्पादयति **नित्येति**। नित्यत्वं ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वम्। अनित्यत्वं च ध्वंसप्रतियोगित्वम्। **परमाणुरूपेति**। ननु परमाणुसद्भावे किं मानमिति चेदुच्यते गवाक्षरंध्रे तरणिकिरणस्थं सर्वतः सूक्ष्मं यद्रज उपलभ्यते तदणुकमित्यभिधीयते तदणुकमवयवजन्यं चाक्षुषद्रव्यत्वाद्घटवदित्यनुमानेन त्र्यणुकावयवः सिद्ध्यति। स एव द्व्यणुक इत्युच्यते सोऽप्यवयवजन्यः महदारम्भकत्वात् कपालवदित्यनुमानेन द्व्यणुकावयवः सिद्ध्यति। स एव परमाणुरित्युच्यते।

अनवस्थाभियावयवधारा नोररीक्रियते । अन्यथा मेरुसर्षपयोरपि साम्यप्रसंगः । परमाणोरनित्यत्वे त्वसमवेतभावकार्य्योत्पत्तिप्रसंगः । ननु त्रिभिः परमाणुभिः कुतो न द्व्यणुकमारभ्यते द्व्यणुकद्वयेन कुतो न त्र्यणुकमिति चेन्न, परमाणुत्रयसंयोगस्य द्व्यणुकद्वयसंयोगस्य च द्रव्यानारम्भकत्वकल्पनात् । किञ्च प्रथमस्य द्रव्यारम्भकत्वे गौरवं स्यात् । द्वितीयस्य च तथात्वे त्र्यणुकमहत्त्वानुपपत्तिश्च । कार्य्यमहत्त्वे कारणमहत्त्वस्य कारणबहुत्वस्य वा कारणत्वात् । **इति परमाणुप्रमाणदर्शनम्** । कार्य्यरूपेति अवयविनी चेत्यपि बोध्यम् । अत्र नास्तिकाः । अवयविसद्भावे किं मानम्, अयं घट इतिप्रतीतिर्हि परमाणुपुञ्जैरेवोपपद्यते, मैवं मंस्थाः । परमाणूनामतीन्द्रियत्वेन घटस्याप्यतीन्द्रियत्वापत्तेः । नचैकस्य केशस्य दूरेऽप्रत्यक्षेण कथं तर्हि तत्समूहस्य प्रत्यक्षमिति वाच्यम्, सन्निधाने एकस्यापि केशस्य प्रत्यक्षत्वसंभवेन दृष्टान्तवैषम्यात् । किंचायं घट इतिज्ञानविषयताया अनन्तपरमाणुकल्पने गौरवाच्चेति सारम् । **इति परमाणुपुञ्जवादः** । कार्य्यरूपपृथिवीं विभजते पुनरिति । पुनः कार्य्यरूपेति शेषः । एवमग्रेऽपि त्रैविध्ये हेतुमाह **शरीरेति** । द्वन्द्वान्ते श्रूयमाणत्वाद् भेदपदस्य प्रत्येकमन्वयात् । शरीरभेदादिन्द्रियभेदाद्विषयभेदादित्यर्थः ॥ अन्त्यावयवित्वे सति चेष्टाश्रयत्वं शरीरत्वम् । हस्तादिवारणाय सत्यन्तम् । घटादिवारणाय विशेष्यम् । अन्त्यावयवित्वं च अवयवजन्यत्वे सत्यवयव्यजनकत्वं । अवयवत्वं च द्रव्यसमवायिकारणत्वम् । अवयवित्वं च जन्यद्रव्यत्वम् । चेष्टा च

**॥ पुनस्त्रिविधा । शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवृत्ति । विषयो मृत्पाषाणादिः ॥**

हिताहितप्राप्तिपरिहारार्था क्रिया। तदिदं शरीरं द्विविधम्। योनिजमयोनिजं च। शुक्रशोणितपरस्परमेलनजन्यं शरीरं योनिजं तद्भिन्नं शरीरमयोनिजम्। योनिजमपि द्विविधम्। जरायुजमण्डजं च। गर्भावरकचर्मपुटकं जरायुः। तज्जन्यं शरीरं जरायुजम्। इदं चास्मदादीनाम्। अण्डजं पक्ष्यादीनाम्। अयोनिजं त्रिविधम्। स्वेदजमुद्भिज्जमदृष्टविशेषजन्यं च। स्वेदजं यूकालिक्षादीनाम्। उद्भिज्जं वृक्षादीनाम्। अदृष्टविशेषजन्यं मन्वादीनाम्। ननु वृक्षादीनां शरीरत्वे किं मानमिति मैवं मंस्थाः, वृक्षः शरीरी आध्यात्मिकवायुसंबन्धादिति तदनुमानात्। ननु तत्रैव मानं न पश्याम इति चेद्वृक्षः आध्यात्मिकवायुसंबन्धवान् वृद्धिक्षयादिमत्त्वादित्यनुमानं कलय। मन्वादीनामयोनिजत्वे "ब्रह्मणो मानसाः मन्वादयः पुत्रा इति" श्रुतिरेव प्रमाणम्। योनिं विना न शरीरमिति वेदे योनिपदं कारणपरमिति मन्तव्यम्। **इति शरीरसामान्यनिरूपणम्।** शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणं मनःसंयोगाश्रयत्वमिन्द्रियत्वम्। शब्देतरे ये उद्भूतविशेषगुणाः घटनिष्ठरूपादयस्तदनाश्रयत्वं ज्ञानस्य कारणभूतो यो मनःसंयोगस्तदाश्रयत्वं च चक्षुरादावस्तीति लक्षणसमन्वयः। भवत्येवेन्द्रियमनःसंयोगस्तथा आत्मा मनसा युज्यते मन इन्द्रियेणेन्द्रियमर्थेन ततः प्रत्यक्षमिति नियमात्। आत्मवारणाय सत्यन्तम्। कालवारणाय विशेष्यम्। श्रोत्रेऽव्याप्तिवारणाय शब्देतरेति। चक्षुरिन्द्रियादावनुद्भूतरूपसत्त्वादव्याप्तिवारणायोद्भूतेति। संयोगस्य द्विनिष्ठत्वेनेन्द्रियार्थसंयोगाश्रयत्वस्य चक्षुरादौ सत्त्वाद्विशेषगुणेति। स्वध्वंसकारणीभूतकालमनःसंयोगस्तदाश्रयत्वं काल इति ज्ञानपदम्। प्राचां मते इन्द्रियावयवार्थावयवयोः संनिकर्षोऽपि ज्ञानकारणं तदाश्रयत्वमिन्द्रियावयवे गतमतो मनःपदम्। यद्वा काले रूपं

नास्तीति प्रत्यक्षं प्रति चक्षुःसंयुक्तविशेषणतायाः कारणत्वेन तद्धटकीभूतसंयोगाश्रयत्वं काले गतमतो मनःपदम् । नच आत्मवारणायात्मान्यत्वमेव निवेश्यतामिति शङ्क्यं, त्वङ्मनःसंयोगस्य ज्ञानकारणतापक्षे त्वचि दोषात् । इति **इन्द्रियसामान्यनिरूपणम्**। भोगोपयोगी विषयः। भोगश्च सुखदुःखान्यतरसाक्षात्कारः । यद्येतल्लक्षणं शरीरादावतिव्याप्तमिति विभाव्यते तदा शरीरेन्द्रियभिन्नत्वमेव तदनुसरम्। वस्तुतस्तु शरीरादिकमपि विषय एव । भेदेन कीर्त्तनं तु बालधीवैशद्याय । **इति विषयसामान्यनिरूपणम्** । पार्थिवं शरीरं दर्शयति **शरीरमिति** ।आदिपदेन पश्वादीनां परिग्रहः। गन्धवच्छरीरं पार्थिवशरीरमिति तल्लक्षणं बोध्यम्। एवमग्रेऽपि। अत्र जलादिसनाथत्वात्पाञ्चभौतिकव्यवहारः।पार्थिवभागस्य मुख्यत्वात्पार्थिवत्त्वम्। एवमन्यत्रापि ।पार्थिवेन्द्रियस्य लक्षणमाह **इन्द्रियमिति**। चक्षुरादावतिप्रसंगवारणाय **गन्धग्राहकेति**। सन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं निवेश्यम् । अथ पार्थिवेन्द्रियं दर्शयति **इन्द्रियमिति** । गन्धवदिन्द्रियं पार्थिवेन्द्रियमिति तल्लक्षणं बोध्यम्। एवमग्रेपि। ननु पार्थिवेन्द्रियं नैवादरणीयं निष्प्रयोजनत्वादिति चेन्न, तत्प्रयोजनमाह **गन्धग्राहकमिति**।तथाच गन्धग्रहणमेव तत्प्रयोजनमस्ति तज्जनकत्वात्पार्थिवेन्द्रियमावश्यकमेवेति भावः।इदमुपलक्षणम् । येनेन्द्रियेण यद्गृह्यते तेनेन्द्रियेण तन्निष्ठा जातिस्तदभावश्च गृह्यत इति नियमाद्गन्धत्वादेरपि ग्राहकमित्यर्थः। एवमग्रेऽपि। नन्वस्तु गन्धग्राहकत्वेन घ्राणनामकमिन्द्रियम्, तथापि तस्य पार्थिवत्वे किं मानमिति चेन्नैवम्, घ्राणेन्द्रियं पार्थिवं रूपादिषु पञ्चसु मध्ये गन्धस्यैवाभिव्यञ्जकत्वात् कुंकुमगन्धाभिव्यञ्जकगोघृतादिवद्वायूपनीतसुरभिपार्थिवभागवद्वेत्यनुमानस्यैव मानत्वात् । नवशरा-

वगतगन्धव्यञ्जकजले व्यभिचारवारणाय एवकारः । तस्य सक्तुरसस्यापिव्यञ्जकत्वात् मध्यान्तोपादानेन घ्राणस्य गन्धत्वव्यञ्जकत्वेऽपि न क्षतिः । हेतुशरीरे द्रव्यत्वमपि निवेश्यं तेन सन्निकर्षे न व्यभिचारः । तस्य संकेतमाह **घ्राणमिति** । घ्राणपदप्रतिपाद्यमित्यर्थः । तदाश्रयमाह **नासाग्रेति** । एवमग्रेऽपि । पार्थिवविषयं दर्शयति **विषय इति** । अत्रादिना पुष्पादिपरिग्रहः । गन्धवान्विषयः पार्थिवविषय इति तल्लक्षणं बोध्यम् । एवमग्रेऽपि । **इति पार्थिवग्रन्थः** । जलं लक्षयति **शीतेति** । नच चन्दनं शीतं शीतं शिलातलमित्यादि प्रतीतेः पृथिव्यामतिव्याप्तिरिति वाच्यम्, जलसमवेतशीतस्पर्शस्यैव स्वसमवायिसंयोगसंबन्धेन तत्र

॥ शीतस्पर्शवत्य आपः । ताः द्विविधाः । नित्या अनित्याश्च । नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । पुनस्त्रिविधाः । शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवृत्ति । विषयः सरित्समुद्रादिः ॥

---

१ शीतश्चासौ स्पर्शश्च शीतस्पर्शः स विद्यते आसामिति शीतस्पर्शवत्यः तासां भावः शीतस्पर्शवत्त्वं शीतस्पर्शवत्त्वं च शीतस्पर्श एव मतुबन्ताद्विहितो भावप्रत्ययः प्रकृतिं गमयतीति सिद्धान्तात् । शीतस्पर्श आधेयः अधिकरणमापः आधेयता शीतस्पर्शनिष्ठा अधिकरणता अप्निष्ठा तथा च शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वमपां लक्षणम् । लक्ष्या आपः लक्ष्यता अप्सु लक्ष्यतावच्छेदकमप्त्वं लक्ष्यतावच्छेदकावच्छिन्ना आपः तासु अप्सु शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं वर्तत इति कृत्वा लक्ष्यासु अप्सु लक्षणसमन्वयः ॥

भानात्। जलं विभजते ता इति। शरीरमिति। इदमयोनिजमेव। एवमुत्तरत्रापि ज्ञेयम्। ननु जलीयशरीरस्य नखदन्तकराद्यसंभवेनाहाराद्यसंभवात्कथं भोगायतनत्वमुपपद्यत इति मैवं मंस्थाः, पार्थिवादिभागसंश्रितत्वेन करकादिवद्घनीभूय दृढीभूतस्य तस्य तात्वादिवाग्व्यापारादिसंभवेनाहारविहारादिसंभवाद्भोगायतनत्वोपपत्तेः। एवमुत्तरत्रापि बोध्यम्। इन्द्रियमिति। ननु रसनेन्द्रियस्य जलीयत्वे किं मानमिति चेच्छ्रूयताम्। रसनेन्द्रियं जलीयं रूपादिषु पञ्चसु मध्ये रसस्यैवाभिव्यञ्जकत्वाल्लालावदित्यनुमानम्। हरीतक्यामलकादौ व्यभिचारवारणायैवकारः। तस्य जलमाधुर्य्यव्यञ्जकत्ववत्कुसुंभादिरूपस्यापि व्यञ्जकत्वात्। शेषं सुगमम्। विषय इति। आदिना तडागहिमकरकादिसंग्रहः। अथ हिमकरकादीनां जलत्वे तत्र नैमित्तिकद्रवत्वं न स्यादिति चेत्को वा नेति ब्रूते अदृष्टविशेषेण घनीभावात्सांसिद्धिकद्रवत्वप्रतिबन्धमात्रकल्पनात्। इति जलग्रन्थः। तेजसो लक्षणमाह उष्णस्पर्शवदिति। उष्णं जलमिति धीस्तु जलान्तर्गते तेजोनिष्ठोष्णस्पर्शस्यैवेति तत्र नातिव्याप्तिः। चन्द्रकिरणादौ तदन्तर्वर्तिवारिस्पर्शाभिभूतत्वादुष्णस्पर्शस्यानुपलंभः। चक्षुरादावनुद्भूतत्वात्तस्य। तथा तेजो विभजते तदिति। चक्षुषस्तैजसत्वे, चक्षुस्तैजसं रूपादिपञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वात् दीपप्रभावदित्यनुमानं प्रमाणम्। हरीतक्यादौ व्यभिचारवारणायैवकारः। रूपग्राहकमिति। इदमुपलक्षणम्। महत्त्वोद्भूतरूपस्पर्शवद्द्रव्यतद्वृत्तिकर्मसामान्यसमवायसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहानामपि ग्राहकमिति द्रष्टव्यम्। ननु बहिरिन्द्रियस्य वस्तुप्राप्यप्रकाशकारित्वनियमेन कनीनिकाग्रवर्त्तिचक्षु-

षो घटादीनां कथं प्राप्तिरिति चेन्नैवम्, दीपप्रभा इव तस्यापि विकाशशालित्वेन तत्प्राप्तिसंभवात् । नच शाखाचन्द्रमसो-

**उष्णस्पर्शवत्तेजः । तच्च द्विविधम् । नित्यमनित्यं च नित्यं परमाणुरूपम् ॥ अनित्यं कार्यरूपम् । पुनस्त्रिविधम् । शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवृत्ति । विषयश्चतुर्विधः । भौमदिव्यौदर्याकरजभेदात् । भौमं वह्न्यादिकम् । अविन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि ।**

स्तुल्यग्रहणानुपपत्तिरिति वाच्यम्, इष्टापत्तेः । शाखाचन्द्रमसौ युगपत्पश्यामीति मतेर्भ्रमत्वात् । तेजसोऽतिशयवेगशालित्वेनैव क्षणविलंबेनैव तद्ग्रहणात् । प्रायशस्तु पदभाष्यानुसारेण । विषयस्य चातुर्विध्यमाह **विषय इति** । अन्यत्र तु उद्भूतरूपोद्भूतस्पर्शवानुद्भूतरूपानुद्भूतस्पर्शवानुद्भूतरूपानुद्भूतस्पर्शवानुद्भूतस्पर्शानुद्भूतरूपवानिति चातुर्विध्ये हेतुमाह **भौमेति** ।

---

१ उष्णाश्चासौ स्पर्शश्च उष्णस्पर्शः स विद्यतेऽस्येत्युष्णस्पर्शवत् तस्य भाव उष्णस्पर्शवत्त्वं तच्चोष्णस्पर्श एव मतुबन्ताद्विहितो भावप्रत्ययः प्रकृतिं गमयतीति सिद्धान्तात् । उष्णस्पर्श आधेयः अधिकरणं तेजः आधेयता उष्णस्पर्शनिष्ठा अधिकरणता तेजोनिष्ठा तथा च उष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं तेजसो लक्षणम् । लक्ष्यं तेजः लक्ष्यता तेजसि लक्ष्यतावच्छेदकं तेजस्त्वं लक्ष्यतावच्छेदकावच्छिन्नं तेजः तस्मिन् तेजसि उष्णस्पर्शनिष्ठाधेयतानिरूपिताश्रयत्वं वर्त्तत इति कृत्वा लक्ष्ये तेजसि लक्षणसमन्वयः ॥ एवंरीत्या सर्वत्र लक्षणसमन्वयः सुधीभिराकलनीयः ॥

भेदादिति पदं प्रत्येकमभिसम्बध्यते तत्र । भौममुदाहरति भौममिति । पार्थिवमात्रेन्धनं तेजोभौमम् । वह्न्यादिकमित्यत्रादिपदेन खद्योतगततेजःप्रभृतेः परिग्रहः । दिव्यं लक्षयति अबिन्धनमिति । अद्भिरिध्यते प्रकाश्यते इत्यबिन्धनम् । तद्दर्शयति विद्युदादीति । आदिनाऽर्कचन्द्रादीनां परिग्रहः । पार्थिवजलोभयेन्धनं तेजऔदर्यं तदेवाभिधत्ते भुक्तस्येति । भुक्तस्यान्नादेः पीतजलस्य च परिणामो जीर्णता तस्य हेतुरौदर्यमित्यर्थः अत एव तदुभयेन्धनम् । आकरजं दर्शयति आकरजमिति । अनुभयेन्धनं तेज आकरजं सुवर्णादिकमित्यत्रादिना रजतादेः परिग्रहः । अथ सुवर्णवादः । ननु सुवर्णं पार्थिवं पीतवत्त्वाद्धरिद्रावदिति चेन्नैतत्, घृतजतुप्रभृतिष्वत्यन्तानलसंयोगे सति द्रवत्वनाशोपलम्भेन जलादिरूपप्रतिबन्धके सति तदनुपलम्भेन च पार्थिवद्रवत्वनाशं प्रति प्रतिबन्धकाभावविशिष्टात्यन्तानलसंयोगस्य कारणत्वेन सुवर्णे तादृशसंयोगे सति द्रवत्वनाशापत्तेः । प्रतिबन्धकत्वं च कारणीभूताभावप्रतियोगित्वम् । भवति हि जलं पार्थिवद्रवत्वनाशं प्रति कारणीभूतो योऽभावो जलाभावस्तत्प्रतियोगि । मीमांसकास्तु तम इव सुवर्णमप्यरिक्तं द्रव्यं शशंकिरे तदपि न युक्तम् । क्लृप्तेष्वन्तर्भावे संभवत्यतिरिक्तद्रव्यत्वकल्पनाया अन्याय्यत्वात् । ननु सुवर्णस्य तैजसत्वे किं प्रमाणमिति चेदत्र ब्रूमः, सुवर्णं तैज-

रूपरहितस्पर्शवान्वायुः । स द्विविधः । नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः । शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवृ-

त्ति। विषयो वृक्षादिकंपनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।

सं प्रतिबन्धकाभावविशिष्टात्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वाद् यन्नैवं तन्नैवं यथा सर्पिरिति। सलिलान्तर्गतहुताशनसंयुक्तसर्पिषि व्यभिचारवारणाय संयोगान्तमिति। ननु सुवर्णस्य तैजसत्वे तन्निष्ठोष्णस्पर्शभास्वररूपे गृह्येयातामिति चेन्न, बलवत्सजातीयपार्थिवरूपस्पर्शाभ्यां तन्निष्ठोष्णस्पर्शभास्वररूपयोरभिभवादग्रह इति संक्षेपः। इति तेजोग्रन्थः। वायुं लक्षयति रूपरहित इति। घटादिवारणाय विशेषणम्। आकाशादिवारणाय विशेष्यम्। अथ वायुप्रत्यक्षतावादः। ननु वायुसद्भावे किं मानमिति चेदत्र प्राञ्चः, विषयतासंबन्धेन बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति समवायसंबन्धेन महत्त्वविशिष्टोद्भूतरूपमुद्भूतस्पर्शश्च कारणम्। एवं सति वायौ तदभावाद्वायुर्न प्रत्यक्षः किं त्वनुमेयः। तथा सति योऽयं वायौ वाति सत्यनुष्णाशीतस्पर्शः प्रतीयते सः स्पर्शः किंचिदाश्रितो गुणत्वाद्रूपवदित्यनुमानेन किंचिदाश्रितत्वे साधनीये यत्किंचित्पदग्राह्यं तदेव वायुरित्युच्यते। नच तत्पृथिवी भवितुमर्हति॥ उद्भूतस्पर्शवत्पार्थिवस्योद्भूतरूपवत्त्वनियमात् नापि जलतेजसी तत्रानुष्णाशीतस्पर्शाभावात्। नाप्याकाशादि चतुष्टयं तस्य विभुत्वेन सर्वत्र तादृशस्पर्शप्रत्यक्षापत्तेः। नापि मनः तस्यातीन्द्रियत्वेन स्पर्शस्याप्यतीन्द्रियत्वापत्तेरित्याहुः। नवीनास्तु बहिर्द्रव्यप्रत्यक्षं प्रति महत्त्वविशिष्टविभुव्यावृत्तविशेषगुणः महत्त्वविशिष्टोद्भूतरूपोद्भूतस्पर्शान्यतरद्वा कारणम्। एवं सति वायुरपि प्रत्यक्ष एव तत्र तादृशगुणस्य महत्त्वविशिष्टो-

द्भूतस्पर्शस्य सत्त्वात् । इतरथा वायुं स्पृशामि प्रभां पश्यामि तप्तजले तेजः स्पृशामीत्याद्यनुभवापलापप्रसंगः। नचायं भ्रमः। घटं स्पृशामीत्यनुभवस्यापि तथात्वापत्तेः। ननु द्रव्यचाक्षुषं प्रति द्रव्यस्पार्शनं च प्रत्येकं किं कारणमिति चेत्, आद्ये महत्त्वविशिष्टोद्भूतरूपं द्वितीये महत्त्वविशिष्टोद्भूतस्पर्शः। नचायं पक्षो गरीयान् प्राचां मते द्रव्यस्पार्शनकारणत्वस्य रूपेऽप्यभ्युपगम्यत्वेन तुल्यत्वादित्याचक्षते। वायुं विभजते स द्विविध इति। शरीरमिति। तच्च पिशाचादीनाम् स्पर्शग्राहकमिति। इदमुपलक्षणं महत्त्वोद्भूतरूपस्पर्शवद्द्रव्यतद्वृत्तिकर्मसामान्यसमवायसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहानामपि ग्राहकम्। त्वगिति। त्वगिन्द्रियमित्यर्थः। तस्य वायवीयत्वे त्वगिन्द्रियं वायवीयं रूपादिषु पञ्चसु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वादङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवदित्यनुमानम्। सलिलशैत्यव्यञ्जके मनसि लालादौ चातिप्रसक्तिवारणायैवकारः। वृक्षादीत्यत्रादिपदेन तृणादीनां परिग्रहः। ननु प्राणस्याधिकस्य सत्त्वात्कुतो न कृतस्तद्विभाग इत्यत आह शरीरान्त इति। तथाच विषयवायौ तस्यान्तर्भाव इति तात्पर्यम्। अपानादेरतिरिक्तत्वमाशंक्य प्राणे तस्यान्तर्भावमभिधत्ते सचेति। प्राणस्त्वित्यर्थः। एकोऽपीति। एक एव प्राणो हृदादिस्थानरूपोपाधिभेदात्प्राणापानादिशब्दैर्व्यवह्रीयत इत्यर्थः। तदुक्तम् ।

"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः" इति ॥

अथवा मुखनासिकाभ्यां निर्गमनप्रवेशनात्प्राणः। मलादेरधोनयनादपानः। भुक्तपरिणामाय जाठरानलस्य समुन्नयनात्समानः। अन्नादेरूर्ध्वनयनादुदानः। नाडीमुखेषु विततनाद्व्यानः। इति क्रियारूपोपाधिभेदाद्वा तथा व्यवह्रीयत इत्यर्थः।

एवं नागकूर्म्मकृकलदेवदत्तधनञ्जयात्मकवायूनां प्राणेऽन्तर्भावः। नाग उद्गीर्णस्य हेतुः कूर्म्म उन्मीलनस्य कृकलः क्षुधायाः देवदत्तो विजृंभणस्य धनञ्जयः पोषणस्येति बोध्यम्। इति वायुग्रन्थः। इदानीं कार्य्यद्रव्यस्योत्पत्तिविनाशक्रममाचक्ष्महे परमेश्वरस्य चिकीर्षावशात्परमाणुषु कर्मोत्पत्तिः। तदनन्तरं द्वयोः परमाण्वोः संयोगस्ततो द्व्यणुकोत्पत्तिः। तत्र परमाणुः समवायिकारणम्[1]। परमाणुद्वयसंयोगोऽसमवायिकारणम्[2]। परमेश्वरस्तज्ज्ञानं तदिच्छा तत्कृतिः कालो दिक् प्रागभावोऽदृष्टं प्रतिबन्धकाभावश्च निमित्तकारणम्। एतेषां कार्य्यमात्र एव निमित्तकारणत्वात्। तदनन्तरं त्रिषु द्व्यणुकेषु कर्म्मोत्पत्तिस्ततस्तेषां संयोगस्ततस्त्र्यणुकोत्पत्तिः। एवं चतुरणुकाद्युत्पत्तिक्रमेण

---

१ यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः समवायिकारणम्। समुदितार्थश्च यस्मिन् समवायेन संबद्धं सत् कार्यमुत्पद्यते तत्समवायिकारणम्। यद्वा समवायसंबन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वं समवायिकारणम्। समवायसंबन्धेन घटाधिकरणे कपालादौ कपालादेस्तादात्म्यसंबन्धेनैव सत्त्वात् समवायेन घटं प्रति तादात्म्येन कपालं कारणम्। समवायसंबन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणतायाः कपालादौ सत्त्वाल्लक्षणसमन्वयः॥

२ समवायिकारणे प्रत्यासन्नं कारणमसमवायिकारणम्। अयं भावः। समवायसंबन्धावच्छिन्नकार्यतानिरूपिता या समवायस्वसमवायिसमवेतत्व—एतदन्यतरसंबन्धावच्छिन्ना कारणता तदाश्रयत्वम्। तन्तुसंयोगस्य पटसमवायिकारणेषु तन्तुषु प्रत्यासन्नत्वात् कारणत्वाच्च तन्तुसंयोगः पटस्यासमवायिकारणमिति फलितार्थः।

महती पृथिवी महत्यआपः महत्तेजः महान्वायुरुत्पद्यते। ननु त्रिभिः परमाणुभिः कुतो न द्व्यणुकमारभ्यते द्व्यणुकद्वयेन कुतो न त्र्यणुकमिति चेन्न, प्रथमस्य द्रव्यारंभकत्वे गौरवात् प्रमाणाभावाच्च। द्वितीयस्य च तथात्वे त्र्यणुकमहत्त्वानुपपत्तेः। कार्य्यमहत्त्वे कारणमहत्त्वस्य कारणबहुत्वस्य वा कारणत्वात्। एवं परमेश्वरस्य कार्य्यद्रव्यसंजिहीर्षावशात्परमाणुषु कर्मोत्पत्तिः। ततः परमाणुद्वयस्य विभागस्ततः परमाणुद्वयसंयो-

## शब्दगुणमाकाशम्।

गनाशस्ततो द्व्यणुकनाशस्ततस्त्र्यणुकनाशः। एवं चतुरणुकादिनाशक्रमेण महापृथिव्यादीनां नाशः। अयमेवावान्तरप्रलय इत्युच्यते। सर्वकार्य्यद्रव्यध्वंसस्यैवावान्तरप्रलयत्वात्। महाप्रलयश्च सर्वभावकार्य्यध्वंसः। भावकार्य्यं चानित्यद्रव्यमनित्यगुणः कर्म च। किं पुनः सृष्टिप्रलयसद्भावे प्रमाणमिति चेत् "धाता यथा पूर्वमकल्पयत्" इत्यादिश्रुतिः। मीमांसकास्तु। संसारप्रवाहस्य बीजांकुरन्यायेनानादित्वादनन्तत्वाच्च प्रलयसद्भावे च मानाभाव इत्यूचुः। अत्र प्राञ्चः। क्वचित्समवायिकारणनाशाद्द्रव्यनाशः क्वचिदसमवायिकारणनाशाद्द्रव्यनाशमंगीचक्रुः। नव्यास्तु। लाघवात्सर्वत्रासमवायिकारणनाशाद्द्रव्यनाशमंगीचक्रुरित्यलं पल्लवितेन। इतिकार्य्यद्रव्योत्पत्तिविनाशक्रमनिरूपणम्। आकाशं लक्षयति शब्दगुणमिति। शब्दः गुणो यस्य तत्तथा। यद्यपि शब्दवत्त्वमेव लक्षणमुचितं तथापि भट्टानां मते शब्दस्य द्रव्यत्वेन तन्निरासार्थं गुणपदमुपात्तम्। क्वचिच्छब्दगुणकमाकाशमित्यपि पाठः। शब्दगुणमेव शब्दगुणकमिति स्वार्थे कः प्रत्ययः। यद्वा शब्दगुणं करोति जनयतीति शब्दं गुणयतीति वा शब्दगुणकं समवायिकारणमिति यावत् एते-

नाकाशे प्रमाणमपि दर्शितम्। तथाहि शब्दश्च अष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति समवायिकारणकत्वाद् यन्नैवं तन्नैवं यथारूपमिति परिशेषानुमानेन तादृशद्रव्यविधयाकाशः सिद्ध्यति। रूपादिवारणाय सत्यन्तम्। रूपत्वादिवारणाय विशेष्यम्। परिशेषश्च प्रसक्तस्य प्रतिषेधेऽन्यत्राप्रसङ्गात्परिशिष्यमाणे संप्रत्ययः। नच विशेष्यासिद्धिः, शब्दः समवायिकारणकः जन्यगुणत्वात् पृथिवीरूपवदित्यनुमानेन तत्सिद्धेः। नच विशेषणासिद्धिरपि, शब्दोऽष्टद्रव्यानाश्रितः श्रोत्रग्राह्यत्वात् शब्दत्ववदित्यनुमानेन तस्यापि सिद्धेः। ननु तस्य गुणत्वे एव किं मानमिति चेत्, शब्दो गुणः अनित्यत्वे सत्येकेन्द्रियग्राह्यजातीयत्वाद् रूपवदित्यनुमानं मानम्। त्र्यणुकादावनैकान्तिकत्ववारणाय जातीयेति। अन्यत्कृत्यं स्पष्टम्। आकाशस्य पृथिव्यादिवदनेकत्वे मानाभावादाह तच्चैकमिति। चस्त्वर्थे। नचाकाशस्यैकत्वे घटाकाशो मठाकाश इति

## तच्चैकं विभु नित्यं च ॥

व्यपदेशः कथमिति वाच्यम्, घटादिरूपोपाधिभेदेन तादृशव्यपदेशात् सर्वत्र शब्दोपलम्भादाकाशस्य विभुत्वमावश्यकमिति ब्रूते विभ्विति। आकाशस्य विभुत्वादेव नित्यत्वं सेत्स्यतीत्याह नित्यं चेति। ननु "आत्मन आकाशः संभूतः" इति वेदेनाकाशस्य जन्यत्वप्रतिपादनात् कथं तन्नित्यं यज्जन्यं तदनित्यमिति व्याप्तेरिति चेन्न, संभूत इत्यस्य ब्रह्माण्डरूपोपाधिवशादभिव्यक्त इत्यर्थकत्वात्। इतरथा परमाणूनामप्यनित्यत्वापत्तेः। वस्तुतस्तु आत्माकाशयोर्जन्यजनकभावस्यानुमानविरुद्धत्वेन वेदस्यार्थवादत्वकल्पनम्। इदमत्र चिन्त्यम्। आकाशस्य शरीरं नो वर्त्तते परंत्विन्द्रियमस्ति तच्च

प्राचीत्यादिव्यवहारस्योपाधिभेदप्रयोज्यत्वाद्दिगेकैवेति ब्रूते सा चेति । तथाहि यस्मादुदयाचलसन्निकृष्टं यन्मूर्त्तं तत्तस्य प्राची यथा प्रयागस्य काशी । यस्मादुदयाचलविप्रकृष्टं यन्मूर्त्तं तत्तस्य प्रतीची यथा गयायाः पाटलीपुरस्य वा काशी । यस्मात्कनकाचलसन्निकृष्टं यन्मूर्त्तं तत्तस्योदीची यथा रामेश्वरक्षेत्रस्य काशी । यस्मात्कनकाचलविप्रकृष्टं यन्मूर्त्तं तत्तस्यावाची यथा काश्याः रामेश्वरक्षेत्रम् । एवं खण्डान्तरमपि । तदुक्तम् "सर्वेषामेव

**ज्ञानाधिकरणमात्मा स द्विविधः परमात्मा जीवात्मा च । तत्रेश्वरः सर्वज्ञः परमात्मैक एव । जीवः प्रतिशरीरं भिन्नो विभुर्नित्यश्च**

वर्षाणां मेरुरुत्तरतः स्थितः" एवं महादिशि इममेवोपाधिमादाय तादृशव्यवहारो बोध्यः । इदं तु बोध्यं जन्यमात्रं क्रियामात्रं वा कालोपाधिः मूर्त्तमात्रं दिगुपाधिरिति । इति दिग्ग्रन्थः । आत्मानं निरूपयति **ज्ञानाधिकरणमिति** । समवायेन ज्ञानाधिकरणमित्यर्थः । तेन काले नातिव्याप्तिः । आत्मानं विभजते **परमात्मेति** । परमत्वं चोत्कृष्टत्वं तच्च प्रकृते सृष्टिस्थितिप्रलयकर्तृत्वम् । परमात्मजीवयोर्वैलक्षण्यमभिधत्ते **तत्रेति** । परमात्मजीवयोर्मध्ये परमात्मा ईश्वरः सर्वज्ञश्च भवति सत्वेक एवे-

---

१ जीवपदेनात्मा गृह्यते । तल्लक्षणं तु " इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति " ( गौ० १ । १ । १० । ) जीवसद्भावे प्रमाणं प्रत्यक्षमेव जीवस्य अहं सुखी दुःखी, तत्राहमिति मानसप्रत्यक्षविषयत्वादिति नैयायिकाः । जीवो न मानसप्रत्यक्षविषय इति वैशेषिकाः । वैशेषिकाणामयमभिप्रायः । अहं सुखी, इत्याकारकं योग्यविशेषगुणयोगेनैवात्मनः प्रत्यक्षं न तु केवलमहमित्याकारकम् ।

त्यर्थः । नित्यज्ञानाधिकरणत्वं तल्लक्षणमवगन्तव्यम् । अथेश्वरे कथं नित्यज्ञानमिति चेत्सर्गाद्यवसरे परमाणुना द्व्यणुकं करिष्यामीति ज्ञानस्यावश्यकत्वेन तदुत्पादकशरीरादिकारणकलापस्य तदानीं व्यतिरेकेण तस्य नित्यत्वमुररीकुर्म्मः । इत्थमीश्वरेच्छाकृत्योरपि। अत्र चार्वाकाः। ईश्वरसद्भावे मानाभावः। न च वक्तव्यं प्रत्यक्षप्रमाणमिति, तार्किकाणां मते तस्य नीरूपस्पर्शद्रव्यत्वेन बाह्यप्रत्यक्षासंभवात्। नाभ्यन्तरमपि मनसा परमात्मप्रत्यक्षासंभवात्। नाप्यनुमानमीश्वरनिरूपितव्याप्तेरप्रसिद्धेः। नच "द्यावाभूमी जनयन् देव एकः विश्वस्य कर्त्ता भुवनस्य गोप्ता" इत्यादिवेदः प्रमाणमिति, ईश्वरोक्तत्वादेव तस्य प्रामाण्यसंभवेनेश्वराभावे तस्याप्यप्रमाणत्वादित्याहुः ॥ तदसत् यत्र कार्य्यत्वं तत्र कर्त्तृजन्यत्वमिति व्याप्तेः प्रसिद्धत्वेनाङ्कुरादिरूपं कार्य्यं कर्त्तृजन्यं कार्य्यत्वाद् घटवदित्यनुमानेन कर्त्तृजन्यत्वे साधनीये तत्कर्त्तृत्वेनेश्वरसिद्धेः। नच विना कर्त्तारं धरणीसलिलसंयोगादिभिरेवाङ्कुरादीनामुत्पत्तिरिति शंक्यं घटादीनामपि तथात्वापत्तेः। तदुक्तम्—

"जगतां यदि नो कर्त्ता कुलालेन विना घटः।
चित्रकारं विना चित्रं स्वत एव भवेत्तदा ॥ इति

नच स्वेदजादीनामिवाङ्कुरादीनामपि तथात्वे का क्षतिरितिवाच्यं,स्वेदजादीनां कर्त्तृजन्यत्वस्वीकारेण दृष्टान्तविरोधात्। तेषामपि पक्षतावच्छेदकाक्रान्तत्वात्।अन्यथा संसारे नियन्तुरभावेन ग्रहाणां विपरीतोदयापत्तिः। एवं जलधरपटलेन काले वृष्ट्यनुत्पादापत्तिः। सचेतनमन्तरेणाचेतनस्य विनियतकाले गमनागमनासंभवात् । तस्माज्जगत्कर्त्ता कश्चनावश्यकः स एवास्माकमीश्वरः। एवं पतनाभाववद्गुरुत्वाश्रयः पतनप्रतिबन्ध-

3393/0060



कम्प्रयत्नप्रयुक्तः धृतिमत्त्वान्नौकाधृतिवदित्याद्यनुमानमपि मानमित्यूह्यम्। एवमीश्वरमुपासीत "यस्य ज्ञानमयं तपः" इत्यादिश्रुतयोऽप्यनुसन्धेयाः। कर्तृत्वं च कृतिमत्त्वम्। यत्तूपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वमिति तन्न, गौरवात्। केचित्तु कार्य्यमात्रं प्रति जीवेश्वरयोर्न कर्तृत्वेन कारणत्वम्। अनेककृतिषु कारणतावच्छेदकत्वे गौरवात् किंत्वात्मत्वेनैव। एवं सतीश्वरसाधारणात्मत्वजातिरपि सिद्ध्यति। एतेन सुखादिसमवायिकारणतावच्छेदकतया नेश्वरसाधारणता सिद्ध्यतीति पक्षानादरणेऽपि न क्षतिः। अथ कथमीश्वरसाधकानुमानमिति चेत्, अंकुरादिकमात्मजन्यं कार्य्यत्वाद्धटवदिति विभावयामासुः। मीमांसकास्तु कर्मैवेश्वरः स्वर्गादिकमेव पुरुषार्थः मन्त्रमयी देवता अर्थवादवेदो न प्रमाणमिति गदन्ति। मीमांसकैकदेशिनस्तु परिचारककृतकर्म्मणः फलदाता यथा भूपालस्तथा वेदोक्तकर्म्मणः फलदातेश्वर एवेति समूचिरे। इति ईश्वरवादः॥ ननु ईश्वरः किं शरीरी उत तद्रहितः। नाद्यः। तच्छरीरस्य महत्त्वे औदुम्बरफलादौ मशकविशेषोत्पत्तिर्न स्यात् तत्र तस्य प्रवेशासंभवान्मध्यमपरिमाणत्वेऽनित्यत्वप्रसंगाद्देशान्तरे कार्य्यानुत्पत्तिप्रसंगाच्च अणुत्वे दूषणं दरीदृश्यत एव। नान्त्यः। शरीराभावे कर्तृत्वस्यैवासंभवादिति चेन्न, शरीरवत एव कर्तृत्वे मानाभावात्। शरीरमन्तरेणैवेश्वरेण मन्त्रादिवत्कार्य्योत्पादनात्। ईश्वरस्य परमाणव एव शरीरमिति केचित्। आकाशशरीरं ब्रह्मेति श्रुतेराकाशमेव तदित्यपरे। अन्ये तु संसारिणामदृष्टवशादीश्वरस्य शरीरं तच्च ब्रह्मविष्णुशिवानामिति ब्रुवन्ति। अपरे तु भूतावेशन्यायेनेश्वरस्य शरीरमिति मेनिरे। अत्राहुः। ईश्वरः शरीररहित एव परंतु तत्त्वज्ञानसाध्यपरमपुरुषार्थपद-

3393 3393 / संस्कृत / २२



प्रणालिकामूलीभूतोपासनादिभिः संसारपंकनिमग्नाज्ञानिन उद्दिधीर्षुर्लीलाविग्रहं दधाति । स च शिवशक्तिगणेशार्कवि-ष्णूनां ब्रह्मणश्च । तदुक्तम् ।

शिवशक्तिगणेशार्कविष्णुरूपात्स ईश्वरः ।
उपासनानुसारेण भक्तेभ्यो भुक्तिमुक्तिदः ॥

इति । अत्र वैष्णवाः शिवादीनां नेश्वरत्वं शिवस्तु विष्णो-रुपासकः तामसत्वान्नोपास्यश्च शक्तिस्तु तदीया माया ब्रह्मा-दयस्तु तदाज्ञावर्तिनः यो लक्ष्मीनिवासः तत्साम्यं कुतः शिव-स्य श्मशानवासिनः सुतरां शच्यादीनां किंच विष्णुव्यति-रिक्तानामुपासनैव निषिद्धा । तदुक्तम् ।

वासुदेवं परित्यज्य य उपास्तेऽन्यदैवतम् ।
तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः ॥ इत्याहुः ।

अत्र शैवाः श्रीमच्छिवस्य कटाक्षलेशमात्रमाश्रित्य महापद-वीं प्राप्तवतां विष्ण्वादीनां कुत ईश्वरत्वं विष्णुस्तु शिवस्योपा-सकः अत एव स्वनेत्रं समर्प्य चक्री पुण्डरीकाक्ष इति नाम लब्धवानाराधनांतरेण लक्ष्मीं वैकुण्ठं च स्वत एवाद्यापि रा-मेणापि पूजितो रामनाथः सेतौ प्रत्यक्षसिद्धः । नच तर्हि कथं वि-ष्णुचरणोदकं बिभर्ति हर इति, तच्च भक्तपराधीनत्वाद् अत एवेश्वरः परमेश्वर इत्ययमेव व्यवह्रियते शक्तिरस्यैव माया यः शुद्धस्फटिकसंकाशः सूर्यचन्द्राग्निलोचनः लीलानाटकसूत्र-धारः क्वचिद्घोररूपः क्वचित्सौम्यरूपः क्वचिच्छ्मशानवासी क्व-चिदनेकदेवगणसमाश्रितानुपमकैलासशिवलोकादिवासी तस्य शिवस्य साम्यं कुतो विष्ण्वादीनां कुतो वा उपास्यत्वम् । तदुक्तम् ।

शुद्धस्फटिकसंकाशं सर्वव्यापिनमीश्वरम् ।
कलये जगदाधारं विष्णुब्रह्मादिसेवितम् ॥ इति

शिवस्तामस इति यदुक्तं तत्तुच्छं, रुद्रावतारस्य भिन्नत्वात्। तत्तु श्यामवर्णादिदर्शनेन विष्णोरेव तामसत्वात्। श्मशानवासित्वेन नैकृष्ट्यं यद्दर्शितं तदपि न तस्य स्वतन्त्रत्वात्। तदुक्तम्॥

अनन्तरूपस्य शिवस्य लीलया
विहारशीलस्य विचित्रकर्मणः।
अनेकरूपेण च भीषणेन
स्वरूपहानिर्न भवेत्कदाचन॥

सुखं वा कुतस्तस्य दुःखं कुतो वा
कुतः सुन्दरत्वं कुतोऽसुन्दरत्वम्।
अनेकैः स्वरूपैरनेकैः प्रकारैः
सदा लीलया खेलतश्चिन्मयस्य॥ इति।

किंच शिवातिरिक्तदेवतानामुपासनैव निषिद्धा। तदुक्तम्।

महादेवं परित्यज्य य उपास्तेऽन्यदैवतम्।
स मूढो विषमश्नाति सुधां त्यक्त्वा क्षुधातुरः॥

इति गायन्ति। अत्र शाक्तिकाः किं शंभोरुपासनया यया शक्त्या ब्रह्मविष्णुमहेशा निर्मिताः यत्कृपामवलम्ब्य ब्रह्मादयः सृष्ट्यादिकं रचयन्ति तत्साम्यमपि प्राप्तुं नार्हन्ति ते त्रयो देवाः कुतो वा तदधीनत्वं तस्याः परदेवताया निगदितमज्ञानत इति समूचिरे। एवं गाणपत्यादयस्तत्तदौत्कृष्ट्यं वर्णयामासुः। अत्र स्मार्त्तपौराणिकादयः। एतेषां मोक्षः कथं भवेत् तदुक्तम्॥

माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ।
वन्दे परस्परात्मानौ परस्परनतिप्रियौ॥ इति।

मया पुराणोपपुराणयुक्ताः सांगाश्च वेदाः स्मृतयः समस्ताः।
शास्त्राणि सर्वाणि विलोकितानि न क्वापि दृष्टः शिवविष्णुभेदः॥

इति। तदुक्तम्

शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ।
ईषदप्यन्तरं कृत्वा रौरवं नरकं व्रजेत् ॥

इत्येवमत्र वेदोऽप्याह

स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराड् इति । तत्तद्देवताप्रस्तावे तत्तद्देवतामुख्यकर्तृकसृष्ट्यादिप्रदर्शनं तु कल्पभेदाभिप्रायकम् । अत एव शक्त्यादीनामपि ताभ्यामभेदः । तदुक्तम्

शैवाः शाक्ताश्च गाणेशाः सौरा विष्णुप्रपूजकाः ।
विद्विषन्ति मिथो भ्रान्त्या तेषां भक्तिश्च निष्फला ॥
सिद्धान्ता बहवः प्रोक्ताः श्रुत्या नानाप्रयोजनैः ।
परं तस्या अभिप्रायं जानाति विरलः कृती ॥
अनेककार्य्यसिद्ध्यर्थं रूपं बहुविधं विभोः ।
तत्कार्य्याज्ञानतो मूढैस्तत्पाषण्डं प्रतिष्ठितम् ॥ इति

इयान् विशेषः । यदि शिवे भक्तिर्महती स्यात्तदा विष्णुरपि शिवत्वेनैव ज्ञेयः । तदुक्तम्

शिवे च भक्तिर्बहुला यदि स्यात्तथा शिवत्वेन भजेद्धरिं च
हरौ च भक्तिर्बहुला यदि स्यात्तथा हरित्वेन भजेच्छिवं हि ।

इति

अतः कूपमण्डूकन्यायेन लोकाः ज्ञानशून्या भवन्तीति जगदुरिति शरीरेश्वरवादः । जीवइति । तत्र इत्यनुषज्यते बन्धमोक्षयोग्यो जीवः जन्यज्ञानाधिकरणं वा अयमेव क्षेत्रज्ञ इत्युच्यते । प्रतिशरीरं भिन्न इति । सुखदुःखादिवैचित्र्यादिति हेतुः पूरणीयः । जीवस्याणुत्वे सर्वशरीरव्यापिसुखाद्यनुपलब्धिप्रसंगः । मध्यमपरिमाणत्वेऽनित्यत्वापत्त्या कृतहानाकृताभ्यागमप्रसंग इत्यभिप्रायवानाह विभुरिति । विभुत्वान्नित्यत्व

मर्थादायातमित्याह नित्यश्चेति । ननु जीवसद्भावे किं मानमिति चेन्न, अहं सुख्यहं दुःखीति मानसप्रत्यक्षस्य मानत्वात् । न चात्मा तावन्नप्रत्यक्ष इति भाष्यविरोध इति वाच्यम्, तस्य परमात्मपरत्वात्प्रतिपादितं चैवात्मतत्वविवेके । ननु विप्रतिपन्नं प्रति कथं प्रत्यक्षमुपन्यस्तुं शक्यमिति चेत्तत्रानुमानमेव मानं बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वाद् यो यदनाश्रितो गुणः स तदतिरिक्तद्रव्याश्रितः यथा पृथिव्याद्यनाश्रितः शब्द इत्यनुमानेन नवमं द्रव्यमात्मा सिद्ध्यति । नच वक्तव्यं ते भूतानां गुणा भवन्त्विति, तथा सति तेषामाभ्यन्तरप्रत्यक्षानुपपत्तेः। भूतगुणानां रूपादीनां बाह्यप्रत्यक्षस्यैवानुभवसिद्धत्वात् । अतएव भूतत्वं बहिरिन्द्रियग्राह्यविशेषसगुणवत्त्वमिति संगच्छते । विशेषगुणत्वादेव न दिक्कालमनसां गुणाः । ननु विशेषगुणत्व एव मानं न लभामहे इति चेन्न, बुद्ध्यादयो विशेषगुणाः एकेन्द्रियग्राह्यत्वे सति गुणत्वाद् रूपवदित्यनुमानं मानमेवमिन्द्रियं सकर्तृकं करणत्वात् कुठारादिवदित्यनुमानेनाप्यात्मा सिद्ध्यति । अत्र षडपि नास्तिकाः क्रमशः शंकन्ते स्म । तत्रादौ शून्यवादिनो माध्यमिकाः। सुषुप्त्यव्यवहि-

---

१ प्रदेशविशेषावस्थितमनःसंयोगः सुषुप्तिः । स च प्रदेशः पुरीतदात्मकः । पुरीतत् अन्त्राख्यो नाडीविशेषः । तथा च श्रुतिः । " अथ यदा सुप्तो भवति तदा न कस्यचन वेद हितानाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते" ( शतपथ ) । सुषुप्तेरुत्पत्तिस्तु नवीनैरित्थं प्रतिपादिता । प्रथमं सुषुप्त्यनुकूलमनःक्रियया मनसा आत्मनो विभागः तत आत्ममनःसंयोगनाशः, ततः पुरीतदात्मकोत्तरदेशेन मनसः संयोग उत्पद्यते, सैव सुषुप्तिः ॥ ( दि० )

तोत्तरक्षणे उत्थितस्य सुषुप्तावहं नासमित्यनुभवात् शून्यमेवात्मा अतएव सर्वमिदं मिथ्यैव तत्र श्रुतिरप्याह असदेवेदमग्र आसीदित्याहुः। तदसत् सुषुप्तावहं नासमित्यनुभवस्याप्रामाणिकत्वात्प्रामाणिकत्वे त्वात्मनि तस्य ज्ञानाभावोपरक्तत्वाद् यन्मिथ्येदमुक्तं तदपि न सत् प्रत्यक्षतोऽनुभूयमानपदार्थस्याशक्यापलापत्वात् उपदर्शितवेदस्य गतिर्वक्ष्यते। क्षणिकविज्ञानवादिनो योगाचार्यास्तु क्षणिकविज्ञानमेवात्मा तद्द्विविधं प्रवृत्तिविज्ञानमालयविज्ञानं च। तत्रायं घट इत्यादि प्रवृत्तिविज्ञानं सुषुप्तावहमित्यालयविज्ञानम्। सुखादिकमस्यैव विकारः तदतिरिक्तवस्तु नास्त्येवाप्रसिद्धेः। अत्र च श्रुतिरप्याह अन्योऽन्तरात्मा विज्ञानमय इत्याहुः। तदसत् पूर्वानुभूतपदार्थस्मरणानुपपत्तेः। अनुभवितुरिदानीमभावाद् अन्यानुभूतेऽर्थेऽन्यस्यानुसंधानायोगात्। ननु कस्तूरीसुरभिपटवत्पूर्वपूर्वविज्ञानोत्पादिततत्तत्संस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वमिच्छाम इति माभाषिष्ठाः, तथासति जनन्यनुभूतपदार्थस्य गर्भस्थात्मजेन स्मरणापत्तेरित्याद्यन्यत्र विस्तरः। सौत्रान्तिकास्तु ज्ञानाकारानुमेयक्षणिकबाह्यार्थ एवात्मेतीच्छन्ति। वैभाषिका क्षणभंगुरवादिनस्तु क्षणिकबाह्यार्थ एवात्मेतीच्छन्ति तदुभयमपि तुच्छं घटादीनां तथात्वे मानाभावात्। एते चत्वारो नास्तिका बौद्धा इत्युच्यन्ते। बौद्धानामष्टादशभेदाः प्रसिद्धाः। उपभेदास्तु बहवः ते च विस्तरभियेह नोक्ताः। चार्वाकास्तु। ब्राह्मणोऽहं गौरोऽहं स्थूलोऽहं जानामीत्यादि सामानाधिकरण्यप्रतीतेः ब्राह्मणत्वादिधर्मवति शरीर एव ज्ञानसुखाद्याश्रयत्वं सिद्ध्यतीति शरीरमेवात्मा अत्र श्रुतिरप्याह स वा एष पुरुषोऽन्नरसमय इति। ननु शरीरस्य पार्थिवत्वे घटादिवन्न चेतनं तदिति चेन्मैवं

मंस्थाः, केवलनागवल्लीदलस्य रागानुत्पादकत्वेऽपि नागवल्ली-दलखदिरचूर्णक्रमुकसमुदायात्मकताम्बूलस्य रागोत्पादकत्व-वत्केवलपार्थिवस्य चैतन्यानुत्पादकत्वेऽपि भूतचतुष्टयसमुदा-यात्मकशरीरस्य तदुत्पादकत्वे किं बाधकमित्याहुः। तन्न मृत-कशरीरेऽपि ज्ञानापत्तेः। ननु ज्ञानं प्रति शरीरप्राणसंयोगस्या-पि कारणत्वेन तदानीं तदभावान्न तदुत्पत्तिः इतरथा नैया-यिकानां नये आत्मना विभुत्वेन मृतशरीरज्ञानापत्तिवारणं तु गीर्वाणगुरूणामप्यशक्यमिति चेन्न, अवयवोपचयापचयैः शरीरस्योत्पादविनाशशालित्वेन बाल्यानुभूतपदार्थस्य वार्द्ध-के स्मरणानुपपत्तेः। वीचितरङ्गन्यायेन संस्कारपरंपरांगी-कारस्तु न युज्यते बाढं गौरवात्फलमुखं गौरवं न दोषायेति चेत्तर्हि विद्वत्त्वनृपत्वमूर्खत्वदरिद्रत्वादिनियामकं भवन्तः किं ब्रुवन्ति। संसारस्य स्वभाव एवेदं सर्वमिति चेद्वैपरीत्ये किं नियामकम्। अस्तु जन्मसमय एवेति चेत्तर्हि तत्तस्मिन्नेव समये जन्म नतु समयान्तर इत्यत्रैव किं नियामकम् । अस्तु ईश्वर एव भवन्मते नियामक इति वक्तुमशक्यं तस्य समदर्शित्वात् । तस्माददृष्टमेव नियामकमिति वाच्यम् । तच्चात्मानमन्तरेणानु-पपन्नमिति शरीरातिरिक्त एवात्माभ्युपेयः। चार्वाकैकदेशिनस्तु काणोऽहमहं जानामीतीन्द्रियधर्मसामानाधिकरण्यदर्शनात्सुषु-प्तिदशायां सत्यपि शरीरे चक्षुराद्युपरमे घटाद्यनुपलब्धेश्चेन्द्रिय-मेवात्मेत्याहुः। तच्च बालप्रलपितं चक्षुरादिनाशे योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीत्यभेदप्रत्ययानुपपत्तेः। नचेन्द्रियान्तरे-णानुसंधीयत इति वाच्यम्, अन्यानुभूतेऽर्थेऽन्यानुसंधानायो-गाच्च। अपरे चार्वाकास्तु सुषुप्तिदशायां चक्षुरादीनामुपरमेऽपि मनसा सर्वव्यवहारदर्शनात् तस्य नित्यत्वाच्च मन एवात्मा

अत्र श्रुतिरप्याह अन्योऽन्तरात्मा मनोमय इति मन्यन्ते। तदसत् मनसोऽणुत्वेन सुखाद्यनुपलंभप्रसंगात्। इतरे चार्वाकास्तु प्राणेन विना व्यवहारादर्शनात् पिपासावानहमित्याद्युपलब्धेश्च प्राण एवात्मा अत्र श्रुतिरप्याह अन्योऽन्तरात्मा प्राणमय इति कल्पयन्ति। तदपि न युक्तम्। तस्यानित्यत्वेन तदुरस्युपदर्शितदूषणगणबाणप्रहारपातात्। पुत्रे पुष्टेऽहमेव पुष्टः पुत्रे नष्टेऽहमेव नष्ट इत्याद्यनुभवदर्शनाद् आत्मा वै जायते पुत्र इति श्रुतेश्च पुत्र एवात्मेत्यपि कश्चित्। तदपि न तादृशानुभवस्याभिमानत्वात्। उपदर्शितश्रुतीनामात्मनां ज्ञानाधिकरणत्वप्रतिपादकसत्यं ज्ञानमिति दृश्यमानश्रुतिबाध्यत्वात् पूर्वपक्षे तात्पर्यम् । दिगम्बरास्तु। देहातिरिक्तदेहपरिमाण आत्मा स च दीपप्रभावसंकोचविकासशालीत्याहुः । तदप्यकिंचित्करं तस्यानित्यत्वापत्त्या तच्छिरसि पूर्वोक्तदोषवज्रप्रहारपातात्। इति संक्षेपः। इति नास्तिकमतखण्डनम्। अथ सांख्यशास्त्रज्ञाः। आत्ममूलप्रकृतिमहदहंकारपञ्चतन्मात्राषोडशविकारभेदात्पञ्चविंशतितत्त्वानि। तत्र शीकरनिर्लिप्ततामरसपलाशवत्कर्तृत्वभोक्तृत्वादिनिर्लिप्त आत्मा स च न प्रकृतिर्न विकृतिश्च न कारणं न कार्य्यमिति यावत् परन्तु चेतनः मूलप्रकृतिस्तु जगत्कर्त्री नित्या जडा च अत एव न विकृतिः महत्तत्त्वं च प्रकृतेः परिणामः प्रकृतिकार्य्यमिति यावत्। अहंकारश्चाहं सुखी अहं दुःखीत्याद्यभिमानः अयं च महत्तत्त्वस्य कार्य्यं तन्मात्रं च शब्दस्पर्शरूपरसगन्धाः एतेऽहंकारस्य कार्य्याणि महदादयश्चैते सप्त प्रकृतयो विकृतयश्च विकारास्तु श्रोत्रत्वक्चक्षूरसनाघ्राणानि पञ्चज्ञानेन्द्रियाणि वाक्पाणिपादोपस्थपायवः पञ्चकर्मेन्द्रियाणि मनआकाशवायुतेजोजलपृथिव्यः पञ्चमहाभूता-

नीति षोडशसंख्याकाः तैर्महाभूतैः शरीरमुत्पाद्यते तत्संबंधवश त्प्रकृतिरेव सर्वं करोति तत्संसर्गवशादात्मनोऽहंकरोमीत्याभिमानो जायते स एवात्मनो बन्ध इत्युच्यते तन्निवर्त्तनाच्च मोक्ष इत्याहुः। तदसत्। अहं कर्त्ताहं भोक्ताहं जानामीति कर्त्तृत्वभोक्तृत्वचैतन्यानां सामानाधिकरण्यप्रतीतेश्चेतनातिरिक्तप्रकृतिसद्भावे मानाभावात्। जडायाः प्रकृतेः कर्त्तृत्वासंभवाच्च। ननु

प्रकृतेः क्रियामाणानि गुणैः कर्म्माणि सर्वशः।
अहंकारविमूढात्मा कर्त्ताहमिति मन्यते॥

इति भगवदुक्तेः सामानाधिकरण्योपलंभो भ्रम एवेति चेन्न, प्रकृतेरदृष्टविशेषस्य गुणैस्तज्जन्मेच्छादिभिरहमेव कर्तेति तदर्थत्वात्। यद्वा प्रकृतेरीश्वरेच्छानुसारवशाद्गुणैर्जन्यज्ञानादिभिरित्यर्थत्वात्। अत एव "तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः" इत्युपरितन भगवदुक्तिः संगच्छते इति कृतं पल्लवितेन। इति सांख्यमतनिरूपणम्। पातञ्जलशास्त्रज्ञास्तु। आत्मा योगगम्यः। योगश्चित्तवृत्तिनिरोधनम्। तच्च चित्तस्य बाह्यविषयनिवर्त्तनादन्तराभिनिवेशः। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभेदादष्टौ योगाङ्गानि। तत्रास्तेयकर्मनिवृत्तिकरुणार्जवशान्तिशौचधृतिमिताहारसत्यभाषणजीवाहिंसनब्रह्मचर्यभेदाद्दश यमाः। आस्तिकत्वहर्षतपःसुरार्चनदानलज्जासञ्ज्ञानहोमसच्छ्रवणजपभेदाद्दश नियमाः। पद्मासनस्वस्तिकभद्रवज्रवीरासनभेदात्पञ्च मुख्यासनानि। अन्यान्यपि एकोनाशीतिरासनानि सन्ति। पूरककुंभकरेचकभेदात्प्राणायामस्त्रिविधः। स चाल्पप्राणसंचारनियामकः। इन्द्रियाणां विषयनिवर्त्तनं प्रत्याहारः। अङ्गुष्ठादिब्रह्मरंध्रान्तं तत्तत्स्थानेषु प्राणधारणं धारणा। ततो हृदयारविन्दे शिवस्य विभावनं ध्यानम्। ततः

प्राणान्निरुध्यात्मना सह शिवस्यैकभावनं समाधिः। एतादृशाङ्गसहितेन योगेन शिवमयं ज्योतिरवलोक्यते इदमेव समाधिसिद्धिरित्युच्यते । तदुक्तं

चित्तस्याधिकसाधितस्य तु बहिर्वृत्तेर्निरोधः क्रमा-
दन्तर्वृत्तितयान्तरेव विगलत्पीयूषमास्वादयेत् ।
स्वात्मन्येव सदा सदाशिवमयं तज्ज्योतिरालोकयेत्
सान्द्रानन्दपरंपरामनुभवेत्सिद्धिः समाधेरियम् ॥

इत्याहुः ॥

इति पातञ्जलमतनिरूपणम् । वेदान्तिनस्तु एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतेरेकं ब्रह्मैवास्ति तच्चाविनाशी वारेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेर्नित्यविज्ञानस्वरूपं तदेवैकोऽहं बहुस्यामिति श्रुतेरुपाधिवशाज्जीव इत्युच्यते। तस्यैव स्वमायानिर्मिताऽविद्याविद्याभ्यां बन्धमोक्षौ भवतः । शरीरे आत्मत्वाभिमानकारयित्र्यविद्या विद्या तु तन्निवर्तिका शरीरे आत्मत्वाभिमानो बन्धः तन्निवृत्तिरेव मोक्ष इत्युच्यते तस्मिन्नेव ब्रह्मणि रज्जौ सर्प इव मिथ्याभूतसंसारो भासते तस्माद्ब्रह्मैव सत्यं जगन्मिथ्या इत्याहुः । इदमपि युक्तं न प्रतिभाति प्रत्यक्षसिद्धपदार्थस्य मिथ्यात्वासंभवात् । नच रज्जौ तर्हि कथं सर्पस्य मिथ्यात्वमिति वाच्यम्, प्रसिद्धस्यैव सर्पस्य तत्र भानाङ्गीकारेण दृष्टान्तवैषम्यात् । नच तत्राप्यसदेव सर्पो भासते इति वाच्यं, तथा सति शशकशृंगस्यापि भानापत्तेः। अथ तर्हि स्वप्ने कथं शस्त्रप्रहारादेर्मिथ्यात्वमिति मा भाषिष्ठाः, प्रसिद्धस्यैव शस्त्रप्रहारादेः स्वस्मिन्नारोपमात्रत्वात् । अत एव स्वप्नो मानसविपर्यय इति वक्ष्यामः। नच मिथ्यात्वप्रतिपादकश्रुतेरप्रामाण्यापत्तिरिति वाच्यम्, तस्याजन्यभावस्य नश्वरत्वप्र-

तिपादने तात्पर्यात्। अन्यथा वेदस्यापि मिथ्यात्वापत्त्या त तिपाद्यब्रह्मणोऽपि तथात्वापत्त्या नास्तिकमतप्रवेशप्रसङ्गः दुक्तम् ॥

प्रत्यक्षादिप्रमासिद्धविरुद्धार्थप्रबोधकः ।
वेदान्तो यदि शास्त्रं स्याद्बौद्धैः किमपराध्यते ॥

एवं यन्नित्यविज्ञानं ब्रह्मेत्युक्तं तदपि न, तस्य दुरुपपाद त्वात् । तथाहि किमात्ममात्रं नित्यविज्ञानस्वरूपं उत जी किमुतेश्वरः । नाद्यः यद्यज्ज्ञानं तत्तत्सविषयकमिति नि मात् तस्यापि कश्चन विषयो वाच्यः । स किं यावज्जगदि ब्रूषे किं वा यत्किंचित् घटपटादिः । नाद्यः मेर्वादीनाम् यावदन्तर्गतत्वेन मेरुर्मद्विषय इत्यनुभवापत्तेः सुषुप्तावपि विषयाभासप्रसंगाच्च । नच वक्तव्यं निर्विषयकमेव तदुररीक्रियते इति निर्विषयकस्य ज्ञानत्वे मानाभावात्। न द्वितीयः घटस्तद्विषयः पटस्तद्विषयो वेत्यत्र विनिगमनाविरहेण भक्षितेऽपि लशुने न प्रशान्तिर्व्याधेरिति न्यायेन तद्दोषतादवस्थ्यात्। विनिगमना च एकत्र पक्षपातिनी युक्तिः। जीवस्य नित्यविज्ञानरूपत्वे उपदर्शितदोषवारणं चतुर्मुखब्रह्मणोऽप्यशक्यं प्रमाणाभावाच्च।नचेश्वरस्यापि नित्यविज्ञानस्वरूपत्वं संभवति सत्यं ज्ञानमित्यस्य घटो नील इत्यस्येव ज्ञानगुणवदिति तदर्थवत्त्वात्। अत एव यः सर्वज्ञः स सर्वविदिति श्रुतेः प्रामाण्यं निर्वहति। जीवब्रह्मणोरैक्यमिति यदुक्तं तदपि न सुखदुःखादिवैचित्र्याज्जीवानामनेकत्वेन तत्रैकत्वासंभवात्। अहं जीवो नेश्वर इति प्रतीतेश्च। अतएः कश्चन संसारी बद्धः कश्चन संसारी मुक्त इति व्यवहार उपपद्यते नन्वेकमेवाद्वितीयं ब्रह्मेति श्रुतेः का गतिरिति चेन्न, एकत्वसमनियतविजातीयवैलक्षण्यस्यैवाद्वितीयपदार्थत्वात प्रकृते जगत्कर्तृ-

त्वमेव वैलक्षण्यम्। एको विद्वानद्वितीय इत्यादौ विद्याधिक्यरूपवैलक्षण्यवत् समानेषु दशमुक्ताफलेषु विजातीयो घटस्तद्वैलक्षण्यसत्त्वेनाद्वितीयव्यवहारापत्तिवारणायैकत्वसमनियतत्वं वैलक्षण्यविशेषणम्। नन्वेवं सति सर्वं खल्विदं ब्रह्मेति श्रुतिविरोध इति चेन्न, ब्रह्मेत्यस्य ब्रह्मव्याप्तमित्यर्थकत्वात्। व्याप्तत्वं संबन्धत्वमन्यथा घटादीनामपि ब्रह्मत्वापत्त्या ब्रह्मणोऽनित्यत्वापत्तिः जडत्वापत्तिश्च। नचैकोऽहं बहुस्यामिति श्रुतेरप्रामाण्यप्रसङ्ग इति वाच्यम्, एकोऽहं निराकारो ब्रह्मविष्णुशिवरूपेण बहुस्यामिति तदर्थत्वात्। ननु तत्त्वमसि ब्रह्मविद्ब्रह्मैव भवति इत्यादिश्रुतेर्जीवेश्वरयोरभेदप्रतिपादिकाया अप्रामाण्यमवलम्ब्यतामिति चेन्न, तत्त्वमसीत्यस्य निर्दुःखत्वेन तत्सदृशस्त्वमसीत्यर्थकत्वात्। एवं ब्रह्मैव भवति इत्यस्य निर्दुःखत्वेन ब्रह्मसदृशो भवतीत्यर्थकत्वात्। ऐश्वर्याधिक्येन वैश्योऽयं राजैवेतिवत्। अतएव सर्वे आत्मानः समर्पिताः निरञ्जनः परमसाम्यमुपैतीत्यादिश्रुतिः प्रामाण्यमाप्नोति। वस्तुतः पूर्वपक्षश्रुतीनामिव वेदान्तोपयोगिश्रुतीनामर्थकरणे प्रयोजनाभाव इति संक्षेपः। इत्यात्मनिरूपणम्। मनो निरूपयति सुखेति। सुखाद्युपलब्धिः सुखादिसाक्षात्कारस्तस्य साधनं निमित्तबीजं मन इत्यर्थः। आत्ममनःसंयोगवारणा-

**सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।**

येन्द्रियमिति चक्षुरादिवारणाय सुखेत्यादि। एतेन मनसि प्रमाणमपि दर्शितम्। तथाहि सुखादिसाक्षात्कारः करणसाध्यः जन्यसाक्षात्कारत्वात् चाक्षुषादिवदित्यनुमानाच्चक्षुरादीनां बाधान्मनः सिद्ध्यति। मनो विभजते तच्चेति। मनश्चेत्यर्थः। मनसोऽनन्तत्वे हेतुमाह प्रत्यात्मेति। आत्मानंआत्मानं प्रति प-

त्यात्मं तस्मिन्नियतत्वान्नियमेन वर्त्तमानत्वादित्यर्थः । तथाचै-कैकात्मन एकैकमनस आवश्यकत्वेनात्मनामनन्तत्वान्मनसो-प्यनन्तत्वमिति भावः। ननु आकाशादिवन्मनसो विभुत्वे विभु-द्वयसंयोगानंगीकारेण ज्ञानोत्पत्तिर्न स्यात् ज्ञानासमवायिका-रणाप्रसिद्धेरत आह **परमाणुरूपमिति** । परमाणुस्वरूपमि-त्यर्थः । तथाच मनसोऽणुत्वेनात्ममनःसंयोगः संभवत्येवेति भावः । मीमांसकास्तु मनो विभुस्पर्शरहितद्रव्यत्वादाकाशवदि-त्यनुमानेन विभुत्वं सिद्ध्यति विभुद्वयसंयोगोऽप्यस्त्येवेत्याहुः । नैतत् तादृशसंयोगस्य नित्यत्वापत्त्या सर्वदा ज्ञानोत्पत्तिप्रस-ङ्गेन सुषुप्त्यभावापत्तेः । मम तु यदा मनः पुरीतति प्रविशति तदा सुषुप्तिः यदा निःसरति तदा ज्ञानोत्पत्तिः पुरीतति बहि-र्देशावच्छिन्नात्ममनःसंयोगस्यैव ज्ञानकारणत्वात् । अतएव सुषु-प्तिकाले ज्ञानापत्तिवारणाय ज्ञानमात्रे त्वङ्मनःसंयोगः कारण-मिति मतं निराकुर्वन्ति नव्याः । ननु मनसोऽणुत्वेऽष्टावधा-निनां कथं युगपत् ज्ञानोत्पत्तिः मनसः चक्षुरिन्द्रियसंयोग-काले त्वगिन्द्रियादीनां संयोगासंभवादिति चेन्न, मनसोऽति-शयवेगशालित्वेन क्षणविलंबेनैवेन्द्रियसंबद्धं सदभ्यासविशेष-शाल्यष्टावधानिनां ज्ञानोत्पादनाद्युगपदनुभवामीति प्रत्ययो भ्रमः अतएव किमुक्तं व्यासंगान्न ज्ञातमित्यनुभवो दरीदृश्यते । तथाच न्यायसूत्रं "युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमिति" मनसो नित्यत्वे लाघवं परमाणुरूपत्वाद्वा नित्यमित्याह **नित्यं**

१ मूर्त्तत्वे सति निरवयवः परमाणुः । परं वा त्रुटेः (गौ० ४।२ ३) ॥ त्रुटेः परं यदतिसूक्ष्मं तत्परमाणुः ॥ "यस्मान्नाल्पतरमस्ति य परमोऽल्पस्तत्र निवर्त्तते यतश्च नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे" (वात्स्या० ) निष्कर्षस्तु परमाणुः, जन्यद्रव्यावयवः, अक्रियावान्, अतीन्द्रियः, निरवयवः, नित्यश्चेति नैयायिकवैशेषिकाणां राद्धान्तः ।

चेति। इति मनोनिरूपणम्। अथ द्रव्याणां साधर्म्यवैधर्म्यप्रक्रिया। पृथिव्यादिनवानां समवायिकारणत्वं साधर्म्यं नित्यद्रव्याणामवृत्तित्वम् पृथिव्यप्तेजोवायुमनसां मूर्त्तत्वं क्रियावत्त्वं वेगवत्त्वं परत्वापरत्वे च मूर्त्तत्वं परिच्छिन्नपरिमाणवत्त्वमिति संप्रदायविदः। क्रियासमवायिकारणतावच्छेदकतया सिद्धो जातिविशेष इति नव्याः। आकाशादिचतुष्टयस्य विभुत्वं च किंनाम विभुत्वमिति चेत्सर्वमूर्त्तद्रव्यसंयोगित्वं परममहत्परिमाणवत्त्वं वा दिक्कालमनोभिन्नद्रव्याणां षण्णां विशेषगुणवत्त्वमाकाशजीवयोरव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च। अव्याप्यवृत्तित्वं नाम स्वात्यन्ताभावसमानाधिकरणत्वं यथा एकस्मिन्नेवात्मनि शरीरावच्छेदेन ज्ञानं घटावच्छेदेन तदत्यन्ताभावश्च तिष्ठति तत्समानाधिकरणत्वं ज्ञानेऽक्षतम्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वमिदमपि ज्ञानेऽक्षतमेव। एवमन्यत्राप्यूह्यम्। पृथिव्यादिपञ्चानां भूतत्वं तच्चात्मावृत्तिविशेषगुणवत्त्वं वा। पृथिव्यादिचतुर्णां द्रव्यसमवायिकारणत्वं स्पर्शवत्त्वं च। पृथिव्यादित्रयाणां रूपवत्त्वं द्रवत्ववत्त्वं च पृथिवीजलयो रसवत्त्वं गुरुत्ववत्त्वं च। वैधर्म्यं पूर्ववद्बोध्यम्। इदानीं पृथिव्यादीनां गुणाः प्रदर्श्यन्ते। चतुर्दशगुणाः पृथिव्याः ते च रूपादित्रयोदश संस्कारश्च। चतुर्दशगुणाः जलस्य ते च गन्धवर्जरूपादिस्नेहान्ताः संस्कारश्च। एकादशगुणास्तेजसस्ते च रसगन्धगुरुत्ववर्जरूपादिद्रवत्वान्ताः संस्कारश्च। नवगुणाः वायोस्ते च रूपरसगन्धवर्जस्पर्शाद्यपरत्वान्ताः संस्कारश्च। षड्गुणा आकाशस्य ते च संख्यादिविभागान्ताः शब्दश्च। पञ्च गुणाः कालदिशोः ते च संख्यादि पञ्च। अष्टौ गुणाः परमात्मनः ते संख्यादिपञ्च बुद्धीच्छाप्रयत्नाश्च। चतुर्दश गुणाः

जीवस्य ते च संख्यादि पञ्च बुद्ध्यादिनव च । अष्टौ गुणा मनसः ते च संख्यादिसप्त संस्कारश्च । तदुक्तम् ।

वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश दिक्कालयोः पंच षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च ॥ इति

**इति सिद्धान्तचन्द्रोदये तर्कसंग्रहव्याख्याने द्रव्यविशेषनिरूपणं नाम द्वितीयः परिच्छेदः ॥**

## चक्षुर्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं पृथ्वीजलतेजोवृत्ति तत्र पृथिव्यां सप्तविधं अभास्वरशुक्लं जले भास्वरशुक्लं तेजसि

अथ गुणान्निरूपयितुं तत्र प्रथमोद्दिष्टं रूपं निरूपयति चक्षुर्मात्रेति । रूपत्वादिवारणाय गुणपदम् । रसादिवारणाय चक्षुर्ग्राह्येति । संख्यादिवारणाय मात्रपदं यद्यपि प्रभाभित्तिसंयोगवारणाय गुणपदेन विशेषगुणस्य विवक्षणीयतयातत एव संख्यादिवारणं संभवति तथापि सांसिद्धिकद्रवत्ववारणाय तदावश्यकम् । वस्तुतस्तु परमाणुरूपेऽव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्त्वे सति गुणत्वस्य विवक्षणीयतया विशेषपदं न देयम् । त्र्यणुकादिवारणाय गुणपदं तु देयम् । रूपत्वादीनि सर्वाण्येव जातयः । रूपं विभजते तच्चेति । रूपं चेत्यर्थः । इदं सप्तविधमित्यनेनान्वेति । सप्तविधे हेतुमाह शुक्लेति । ननु चित्ररूपे किंमानं चित्रपट इति प्रतीतिस्तु तन्तुगतनीलपीतादीनामेवेति चेन्न, तथासति पटस्याप्रत्यक्षत्वापत्तेः । बहिर्द्रव्यप्रत्यक्षे समवायेन रूपस्य कारणत्वात् । ननु रूपवत्समवेतत्वमेव बहिर्द्रव्यप्रत्यक्षे कारणमस्तु प्रकृते रूपवान्

तन्तुस्तत्समवेतत्वं पटेऽव्याहतमेवेति चेन्न, लाघवेन रूपस्यैव कारणत्वात् । अथाव्याप्यवृत्तिनीलपीतादीनां निकुरम्बमेव चित्ररूपमस्तु किमतिरिक्तकल्पनेनेति मा वह गर्वं व्याप्यवृत्तिजातीयगुणानां व्याप्यवृत्तित्वनियमात् । किंच तन्तुगतनीलपीतादीनां परस्परविरोधेन पटे नीलादिनिकुरम्बस्यैवानुत्पत्तेः । रूपस्याश्रयमाह । पृथिवीजलतेजोवृत्त्ति । आश्रयं विभज्य दर्शयति । तत्रेति । पृथिव्यादित्रय इत्यर्थः । सप्तविधमिति रूपमित्यनुषज्यते । अभास्वरशुक्लमिति । ननु यमुनासलिलादौ कथं नीलिमोपलम्भ इति चेन्न, तस्य स्थलोपाधिकत्वात् । भास्वरशुक्लमिति । वैश्वानरादौ उपष्टम्भकपार्थिवरूपप्रतिबन्धाद्भास्वरशुक्लस्यानुपलब्धिः । इति रूपनिरूपणम् । रसं निरूपयति

**रसनग्राह्यो गुणो रसः स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः पृथिवीजलवृत्तिः । पृथिव्यां षड्विधः । जले मधुर एव ॥ १ ॥**

रसनेति । षड्विध इति । तथाचावयवगतनानारससमुदायादेव सामञ्जस्ये चित्ररसो नान्वेषितव्य इति भावः । रसस्याश्रयमाह । पृथिवीति । आश्रयं विभज्य दर्शयति । तत्रेति । पृथिवीजलयोरित्यर्थः । षड्विध इति । रस इत्यनुवर्त्तते । जले मधुर एवेति । ननु जम्बीरजलादावाम्लोपलब्धः कथं मधुर एवेति चेन्न, तस्य जम्बीराद्यौपाधिकत्वात् । जले माधुर्यसत्त्वे कुतो नोपलभ्यते इति चेन्न, आमलकभक्षणादीनां तद्व्यञ्ज-

**घ्राणग्राह्यो गुणो गन्धः स द्विविधः । सुरभिरसुरभिश्च । पृथ्वीमात्रवृत्तिः । त्वगिन्द्रियमात्रग्राह्यो**

गुणः स्पर्शः । स त्रिविधः । शीतोष्णानुष्णाशीतभेदात् । स च पृथिवीजलतेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः । रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्रापाकजं नित्यमनित्यं च नित्यगतं नित्यं अनित्यगतमनित्यम् ॥

कत्वात् । इति रसनिरूपणम् । गन्धं निरूपयति घ्राणेति पृथिवीमात्रवृत्तिरिति । पृथिवीसंबन्धसत्त्वे गन्धप्रतीतिसत्त्वं पृथिवीसंबन्धाभावे गन्धप्रतीत्यभाव इत्यन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव जले प्रतीतिर्बोध्या । एवं वायावपि । स्पर्शं निरूपयति त्वगिति । संख्यादिवारणाय मात्रपदम् । तत्रेति । पृथिव्यादिचतुष्टय इत्यर्थः । शीत इति । शीतस्पर्श इत्यर्थः । एवमुष्ण इत्यत्रापि । इति स्पर्शनिरूपणम् । प्रसंगाद्रूपादिचतुष्टयस्य पाकजत्वापाकजत्वे प्रतिपादयन्नित्यत्वानित्यत्वे प्रतिपादयति रूपादिचतुष्टयं पृथिव्यां पाकजमिति । पाकजमपीत्यर्थः । पाकस्तेजःसंयोगः पाकासमवायिकारणकमिति यावत् । ननु कथं पाकात्तज्जन्मेति चेदत्र पीलुपाकवादिनो वैशेषिकाः । आमनिक्षिप्ते घटे हुताशनसंयोगात्परमा-

१ पीलुपाकवादिनो वैशेषिकाः । पीलवः ( परमाणवः ) एव स्वतन्त्राः पच्यन्ते तत्रैव पूर्वरूपनाशाग्निमरूपाद्युत्पत्तिः, कारणगुणक्रमेण चावयविनि रूपाद्युत्पद्यते इत्येवं ये मन्यन्ते ते ॥ इति कणादमतमवलम्ब्य प्रतिपादयति, आमनिक्षिप्त इति ॥

ण्वादिकपालपर्यन्तावयवेषु क्रिया ततः परस्परविभागः ततः परस्परसंयोगनाशः ततोऽसमवायिकारणनाशाद् द्रव्य-नाश इति नियमेन श्यामघटनाशे शिष्टाः परमाणवः पच्यन्ते तत्र पाकेन रूपादिचतुष्टयोत्पत्तिस्ततः परमेश्वरेण सर्गादाविव द्व्यणुकादिक्रमेण पूर्ववद्रक्तघटो निर्मीयते परमाणुरूपेण द्व्यणुकरूपं जन्यते एवं क्रमः अन्यथा घटस्य दृढतरत्वे हुताशनप्रवेशासंभवाद्रूपाद्युत्पत्तिर्न स्यादित्याहुः। पिठरपाकवा[1]दिनो नैयायिकास्तु घटादिकं सच्छिद्रमेव अन्यथा तदन्तर्गततण्डुलादेः पाको न स्याद् अत एकदैव परमाण्वादिघटपर्यन्तेषु घटनाशं विना पाकेनैव रूपाद्युत्पत्तिरिति वदन्तीति संग्रहः। ननु स्पर्शः कथं पाकज इति चेन्न, रसालफलादावातपादिना कोमलकठिनत्वस्पर्शोत्पादनस्य प्रत्यक्षसिद्धत्वात्। केचित्त्ववयवसंयोगविशेष एव काठिन्यादिरित्याहुः। तदसत् तथासति तस्य चाक्षुपत्वापत्तेः। स्पार्शनसंयोगस्य चाक्षुषत्वनियमात्।पाकजत्वादेवानित्यमित्याह। अनित्यं चेति। अन्यत्र नलादावित्यर्थः। अपाकजमिति। अपाकजमेवेत्यर्थः। रूपा-

एकत्वादिव्यवहारहेतुस्संख्या नवद्रव्यवृत्तिः एकत्वादिपरार्द्धपर्य्यन्ता। एकत्वं नित्यमनित्यं च नित्यगतं नित्यमनित्यगतमनित्यं द्वित्वादिकं तु सर्वत्रानित्यमेव॥मानव्यवहारासाधारणकारणं परिमाणम्।

---

१ पिठरपाकवादिनो नैयायिकाः। कार्यकारणसमुदायोऽपि पच्यते नतु परमाणव एव पच्यन्ते, इति ये मन्यन्ते ते। इति गोतमामतमवलम्ब्य प्रतिपादयति घटादिकमिति॥

दिचतुष्टयमित्यनुषज्यते । **इति पाकवादः** । संख्यां निरूपयति **एकत्वादीति** । एकत्वमित्यादिर्यो व्यवहारः एकत्वं द्वित्वमित्याद्यात्मकस्तस्य हेतुः संख्येत्यर्थः । ननु संख्याया अवधिरस्ति न वेत्याशंक्याह **एकत्वादिपरार्द्धपर्यन्ता**। तथा च

> एकं दश शतं चैव सहस्रमयुतं तथा ।
> लक्षं च नियुतं चैव कोटिरर्बुदमेव च ॥
> वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः ।
> अन्त्यं मध्यं परार्द्धं च दशवृद्ध्या यथाक्रमम् ॥

इति महदुक्तेः परार्द्धपर्यन्तैव संख्येति भावः। नित्यानित्यत्वभेदेनैकत्वं द्विविधमित्याह **एकत्वं नित्यगतमिति**। गगनपरमाण्वादिगतमित्यर्थः । **अनित्यगतमिति** परमाणुभिन्नपृथिव्यादिचतुष्टयगतमित्यर्थः। अत्र च कारणगतमेकत्वमसमवायिकारणमिति बोध्यम् । द्वित्वादिकमनित्यमेवेत्याह **द्वित्वादिकंत्विति** । आदिना त्रित्वादिपरिग्रहः। **सर्वत्रेति**। नित्यानित्यद्रव्ययोरित्यर्थः । तथाचापेक्षाबुद्धिजन्यत्वाद् द्वित्वादिकमनित्यमेवेति भावः । ननु कथमपेक्षाबुद्धिजन्यत्वमितिचेदुच्यते घटद्वयसन्निकर्षानन्तरमयमेको ऽयमेक इति ज्ञानं जन्यते इदमेवापेक्षाबुद्धिरित्युच्यते । ततो घटद्वये द्वित्वमुत्पद्यते अत्र घटद्वयगतमेकत्वमसमवायिकारणम् । घटद्वयं समवायिकारणम् । अपेक्षाबुद्धिः निमित्तकारणम् । ततो द्वित्वद्वित्वत्वनिर्विकल्पकं ततो इमौ द्वाविति द्वित्वविशिष्टस्य प्रत्यक्षं तन्निर्वाहार्थमेवापेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यते तस्मिन्नेव क्षणेऽपेक्षाबुद्धेर्नाशः तदुत्तरक्षणे च द्वित्वस्य नाशस्तत्रापेक्षा-

बुद्धिनाशः कारणम्। अन्यथापेक्षाबुद्धिनाशानन्तरमपि द्वित्वम[1]-त्यक्षापत्तिः। एवं त्रित्वादावपि बोध्यम्। अतीन्द्रिये द्वित्वादिकं तु योगीश्वरापेक्षाबुद्ध्या जन्यते तन्नाशश्च योगिनामपेक्षाबुद्धिनाशादिना इति ध्येयम्। ननु शब्दबुद्धिकर्मादीनां द्विक्षणावस्थायित्वात्कथमपेक्षाबुद्धिस्त्रिक्षणावस्थायिनी किंच योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवृत्तिगुणानां कारणत्वाद्द्वित्वनिर्विकल्पकेनैवापेक्षाबुद्धिनाशाच्चेति चेन्मैवम्, अपेक्षाबुद्धिभिन्नानामेव विवक्षितत्वात्। इति संख्यानिरूपणम्। परिमाणं निरूपयति मानेति। मानं परिमितिस्तस्य यो व्यवहारः इदं महदिदमण्वित्याद्यात्मकस्तस्य कारणं परिमाणमित्यर्थः।

**नवद्रव्यवृत्ति। तच्चतुर्विधम्। अणुमहद्दीर्घह्रस्वं चेति। पृथग्व्यवहारासाधारणकारणं पृथक्त्वं सर्वद्रव्यवृत्ति। संयुक्तव्यवहारहेतुस्संयोगः सर्वद्रव्यवृत्तिः।**

परिमाणस्याश्रयमाह **नवद्रव्येति**। तच्च नित्यगतं नित्यमनित्यगतमनित्यम्। परिमाणं विभजते **तदिति**। परिमाणमित्यर्थः। चातुर्विध्यं दर्शयति **अण्विति**। अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः। तेन द्रव्यस्याप्यणुरूपादिना व्यवहारेऽपि न क्षतिः। परममध्यमभेदेन तद् द्विविधम् तत्र परमाणुत्वह्रस्वत्वे परमाणुमनसोः। मध्यमाणुत्वह्रस्वत्वे द्व्यणुके। परममहत्त्वदीर्घत्वे गगनादौ। मध्यममहत्त्वदीर्घत्वे घटादौ इति बोध्यम्।

---

१ इदं द्वित्वं तु व्यासज्यवृत्ति, पर्याप्तिसंबन्धेन द्वयोरेव द्रव्ययोस्तिष्ठति न प्रत्येकस्मिन्। इदमेव द्वित्वमपेक्षाबुद्ध्या जायते तन्नाशेन नश्यति च। अपेक्षाबुद्धिश्च—अयमेकः—अयमेकः—इति बुध्यनन्तरमिमौ द्वाविति जायते—एवं त्रित्वचतुष्ट्वाद्यारभ्य परार्द्धत्वपर्यन्तं ज्ञेयम्॥

एतन्मौक्तिकादिदं मौक्तिकमण्विति व्यवहारस्यापकृष्टमहत्त्वा द्गौणत्वं द्रष्टव्यम् । एवं केतनाद्व्यजनं ह्रस्वमित्यत्राप्यपकृष्टदीर्घ त्वाद्गौणत्वम् । परिमाणं क्वचित्संख्याजन्यं क्वचित्परिमाणजन्यं क्वचित्प्रचयाख्यसंयोगजन्यं च । तत्राद्यं परमाणुद्वित्वजन्यं द्व्यणुके द्व्यणुकबहुत्वजन्यं त्र्यणुके । द्वितीयं कपालपरिमाणजन्यं घटपरिमाणम् । तृतीयं तूलावयवसंयोगजन्यं तूलपिण्डपरिमाणमयमेव संयोगः शिथिल इत्यप्युच्यते । इति परिमाणनिरूपणम् । पृथक्त्वं निरूपयति पृथगिति । अयमस्मात्पृथगिति यो व्यवहारस्तस्य कारणं पृथक्त्वमित्यर्थः । तच्चैकपृथक्त्वद्विपृथक्त्वत्रिपृथक्त्वादिभेदेन बहुविधम् । तत्रैकपृथक्त्वं नित्यगतं नित्यमनित्यगतमनित्यं द्विपृथक्त्वादिकं सर्वत्रानित्यमेव । ननु भेदातिरिक्तपृथक्त्वे किंमानमितिचेन्न, घटः पटो नेति प्रतीतिविलक्षणाया घटः पटात्पृथगिति प्रतीतेरेव मानत्वात् ॥ इतिपृथक्त्वनिरूपणम् ॥ संयोगं निरूपयति संयुक्तेति । इमौ संयुक्ताविति यो व्यवहारस्तस्य हेतुः संयोग इत्यर्थः । उपदर्शितलक्षणचतुष्टये असाधारणपदं देयं । क्वचित्पुस्तके परिमाणपृथक्त्वलक्षणे असाधारणपदं दृश्यते तच्चाधुनिकैर्न्यस्तमिति बोध्यम् । संयोगस्त्रिविधः । अन्यतरकर्मजोभयकर्मजसंयोगजभेदात् । तत्राद्यः शकुन्तशैलसंयोगः । द्वितीयो मेषयोः संयोगः । तृतीयस्तु दर्शित एव । संयोगजः हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः । कर्मजोऽपि द्विविधः । अभिघातो नोदनं चेति । तत्रादिमस्तु शब्दकारणीभूतः । द्वितीयस्तु क्रियादिकारणी-

संयोगनाशको गुणो विभागः सर्वद्रव्यवृत्तिः ।

परापरव्यवहारासाधारणकारणे परत्वापरत्वे

पृथिव्यादिचतुष्टयमनोवृत्तिनी ।

भूतः। इति संयोगनिरूपणम् ॥ विभागं निरूपयति संयोगनाशक इति। संयोगनाशजनक इत्यर्थः। कालेऽतिव्याप्तिवारणाय गुणपदम्। ननु ईश्वरेच्छायामतिव्याप्तिवारणाय यद्यसाधारणजनको विवक्षितस्तदा गुणस्य वैयर्थ्यं स्यादिति चेन्नैवं, क्रियायामतिव्याप्तिवारणाय तस्यावश्यकत्वात्। क्रियाक्रियातो विभागः विभागात्पूर्वसंयोगनाशः उत्तरदेशसंयोगोत्पत्तिरिति नियमात्। क्रियाया अपि तज्जनकत्वात्। नुनु ययोः संयोगस्तयोरेव विभाग इति नियमात् मेरुकैलासौ विभक्ताविति व्यवहारः कथमिति चेन्न,तस्य गौणत्वात्। विभागोऽपि त्रिविधः॥ अन्यतरकर्म्मज उभयककर्म्मजो विभागजश्चेति। उदाहरणं पूर्ववद्बोध्यम्। विभागजविभागोऽपि द्विविधः कारणमात्रविभागजः कारणकारणविभागजश्चेति। तत्रादिमस्तु कपालद्वयविभागात्कपालपूर्वदेशविभागः। द्वितीयस्तु हस्तपुस्तकविभागात्कायपुस्तकविभागः। तस्याश्रयमाह नवेति। इति विभागनिरूपणम्। परत्वापरत्वे निरूपयति परापरेति। परव्यवहारासाधारणं कारणं परत्वम्। अपरव्यवहारासाधारणं

ते द्विविधे दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमपरत्वम्' ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतमपरत्वम्। आद्यपतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्ति। आद्यस्यन्दनासमवायिकारणं द्रवत्वं पृथिव्यप्तेजोवृत्ति। तद् द्विविधं सांसिद्धिकं नैमित्तिकं च। सांसि-

द्धिकं जले नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादौ अग्निसंयोगजं द्रवत्वम् । तेजसि सुवर्णादौ ॥ चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहो जलमात्रवृत्तिः ।

कारणमपरत्वमित्यर्थः । परत्वापरत्वे विभजते त इति । द्वैविध्यं व्युत्पादयति दिक्कृते कालकृते चेति । दैशिकपरत्वापरत्वे कालिकपरत्वापरत्वे चेत्यर्थः । तत्र दैशिकपरत्वमुदाहरति दूरस्थेति । तदुत्पत्तिक्रमस्त्वभिहित एव । अत्र दिक्पिण्डसंयोगोऽसमवायिकारणम् । शेषं सुगमम् । दैशिकमपरत्वमुदाहरति समीपस्थेति । तदुत्पत्तिश्चाल्पतरमूर्त्तसंयोगविशिष्टशरीरज्ञानाद् दैशिकपरत्वापरत्वे मूर्तमात्रवृत्तिनी भवतः । कालिकपरत्वमुदाहरति ज्येष्ठे कालकृतं परत्वमिति । कालकृतं परत्वमिति । कालिकपरत्वमित्यर्थः । तच्च ज्येष्ठत्वमेव तदुत्पत्तौ च कालपिण्डसंयोगोऽ समवायिकारणम् । कालिकमपरत्वमुदाहरति कनिष्ठेति । कनिष्ठत्वमेव कालिकमपरत्वम् । तदुत्पत्तिश्चाल्पतरदिवाकरक्रियाविशिष्टशरीरज्ञानात् । कालिकपरत्वापरत्वे जन्यद्रव्यमात्रवृत्तिनी भवतः । इति परत्वापरत्वनिरूपणम् । गुरुत्वं निरूपयति आद्य इति । आद्यं यत्पतनं कर्मविशेषस्तस्यासमवायिकारणं गुरुत्वमेवेत्यर्थः । द्वितीयादिपतनासमवायिकारणवेगेऽतिव्याप्तिवारणाय आद्येति । तच्च रतिकमाषकतोलकादिभेदेनानेकधा । नित्यगतं नित्यमनित्यगतमनित्यम् । इति गुरुत्वनिरूपणम् । द्रवत्वं निरूपयति आद्यस्यन्दनेति । स्यन्दनं स्रवणं तस्यासमवायिकारणं द्रवत्वमित्यर्थः । तस्याश्रयमाह पृथिवीजलतेजोवृत्तीति । तच्च जलपर-

माणुभिन्नेऽनित्यमित्यपि बोध्यम्। द्रवत्वं विभजते तदिति। द्वैविध्यं दर्शयति **सांसिद्धिकमिति**। स्वाभाविकं सांसिद्धिकं तेजःसंयोगजन्यं नैमित्तिकमित्यर्थः। तत्र सांसिद्धिकमुदाहरति **सांसिद्धिकमिति**। नैमित्तिकमुदाहरति **नैमित्तिकमिति**। ननु नैमित्तिकद्रवत्वस्य पृथिव्यां घटादौ तेजसि वन्ह्यादौ चाभावात् कथं पृथिवीतेजसोरत आह **पृथिव्यामिति**। इति द्रवत्वनिरूपणम्। स्नेहं निरूपयति **चूर्णेति**। चूर्णं पिष्टं तदेवादिर्यस्य मृत्तिकादेः स चूर्णादिस्तस्य पिण्डीभावः संयोगविशेषस्तस्य हेतुर्निमित्तकारणं स्नेह एवेत्यर्थः। कालादावतिव्याप्तिवारणाय गुणपदं रूपादावतिव्याप्तिवारणाय पिण्डीभावेति चूर्णपदं स्पष्टार्थम्। स च नित्यगतो नित्योऽनित्यगतोऽनित्यश्चेति बोध्यं तैलादावन्तर्गतजलभागस्यैव स्नेहः स्नेहप्रकर्षेण जलमपि दहनानुकूलमेव। इति स्नेहनिरूपणम्। शब्दं नि-

**श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः। ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः। सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानम्। सा द्विविधा स्मृतिरनुभवश्चेति। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। स द्विविधो यथार्थोऽयथार्थश्च। तद्वति तत्प्रकारकानुभवो यथार्थः। यथा रजते इदं रजतमिति ज्ञानम्।**

रूपयति **श्रोत्रेति**। शब्दत्वेऽतिव्याप्तिवारणाय गुण इति।

वस्तुतस्तु श्रोत्रोत्पन्नशब्दस्यैव श्रोत्रग्राह्यत्वेन तद्भिन्नेऽव्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्त्वे तात्पर्याद्गुणपदमनुपादेयम् । अथ भेर्य्याद्यवच्छेदेनोत्पन्नशब्दस्य कथं श्रोत्रदेशे ज्ञानोत्पत्तिरिति चेन्न, वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा तदुत्पत्तेः। भेरीशब्दो मया श्रुत इति धीस्तु भ्रान्तिरेव। अत एव भेरीजन्यतारशब्दान्मया मन्दशब्दस्तादृशः श्रुत इत्यनुभवः । सांख्यवेदान्तिनौ पृथिव्यादिपञ्चसु शब्दमिच्छतः। स्वतन्त्रास्तु भेर्य्यां शब्दः मृदङ्गे शब्द इति व्यवहारात्पृथिव्यामेव शब्दमिच्छन्ति। तन्मतनिरासार्थमाह **आकाशमात्रवृत्तिरिति** । तत्र युक्तिस्तु प्रदर्शितैव। शब्दं विभजते **स द्विविध** इति। भेर्यादाविति । भेर्य्याद्यवच्छेदेनेत्यर्थः । आकाशे जायमान इति शेषः । आदिना वेणुवीणामृदङ्गादेः परिग्रहः । वर्णात्मकमुदाहरति । **वर्णात्मक** इति । संस्कृतभाषादिरूप इत्येतदुत्तरम् । स चेति पूरणीयम्। अत्रादिपदेन लौकिकभाषापरिग्रहः। द्विविधोऽपि शब्दस्त्रिविधः। संयोगजो विभागजः शब्दजश्चेति। तत्राद्यः भेरीदण्डसंयोगाद् ध्वन्यात्मकः। वायुकण्ठसंयोगाद्वर्णात्मकः। द्वितीयश्च वंशे पाट्यमाने दलद्वयविभागाद् ध्वन्यात्मकः । स च चटचटात्मकः शब्दः । ओष्ठद्वयविभागाद्वर्णात्मकः। स च ककारादिस्तृतीयश्च द्वितीयशब्दादिचरमशब्दान्तः । अत्र सर्वत्राकाशः समवायिकारणं भेर्य्याकाशसंयोगः कण्ठाकाशसंयोगः वंशदलाकाशविभागः ओष्ठाकाशविभागः । शब्दश्च तत्र तत्रासमवायिकारणमन्यत्सर्वं निमित्तकारणम् । तदुक्तम् । संयोगाच्च विभागाच्च शब्दाच्च शब्दनिष्पत्तिरिति । तन्नाशश्चोत्तरोत्तरशब्देन योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवृत्तिगुणानां कारणत्वात्। अन्त्यशब्दनाशस्तूपान्त्यशब्दनाशेनेति बोध्यम्।

केचित्तु सुन्दोपसुन्दन्यायेनोपान्त्यशब्दस्यान्त्यशब्देनान्त्यशब्दस्योपान्त्यशब्देन नाश इत्यूचुस्तन्न, अन्त्यशब्दनाशपूर्वक्षणे उपान्त्यशब्दस्यैव नष्टत्वेन तस्य कारणत्वासंभवात्। ननु जैमिनीयाः सोऽयं ककार इति प्रत्यभिज्ञाबलाच्छब्दस्य नित्यत्वमङ्गीचक्रुस्तत्कथमनित्यत्वमुपपादितमिति चेन्न, तदेवेदमौषधमिति प्रतीतिवत्तस्या अपि साजात्यालम्बनत्वात्। अतएवोत्पन्नः ककारो विनष्टः ककार इति प्रतीतिः। इति शब्दनिरूपणम्। बुद्धिं निरूपयति सर्वेति। जानामीत्यनुव्यवसायगम्य-

---

१ सुन्दोपसुन्दन्यायस्वरूपं तु यत्रोभयोः पदार्थयोर्न कार्यसिद्धिः किं तूभयोः पदार्थयोरेकत्र प्रवृत्तौ सत्यामुभयोर्नाशः। सुन्दोपसुन्दनामानौ द्वावसुरौ तौ च आवयोः कदापि मरणं माभूदितीच्छया ब्रह्मण अत्युत्कटतपश्चर्यां चेरतुः। तपसा प्रसन्नश्चतुरानन उवाच वरं ब्रूतमिति। तावूचतुः—अमरत्वं याचावहे। ब्रह्मोवाच। स्वयमन्यथासिद्धः परान् कथं साधये ममैव शतवर्षपर्यन्तं जीवितं वर्तते कथं युवयोरमरत्वं कर्तुं शक्योऽस्मि। परस्परं संलापादिकं कृत्वा तावूचतुः। भो ब्रह्मन्—आवयोः अन्योऽन्यं युद्धमन्तरा कदापि मरणं माभूदिति याचावहे। तथास्तु—इत्युक्त्वा ब्रह्मा दिवं गतः। वरप्रमत्तौ तावपि त्रैलोक्यस्य राज्यं चक्रतुः। ताभ्यां पराभूताः सर्वेऽपि देवाः सकललोकैककारणं नारायणं प्रत्याजग्मुः। निवेदितं तच्चेष्टितम्। नारायणेनोक्तं गच्छत स्वस्थानं शीघ्रमेव तदर्थं यतिष्ये। तदनन्तरं विष्णुः स्वयमेव तिलोत्तमाप्सरसो रूपं धृत्वा हस्ते वीणां गृहीत्वारण्ये स्थितः। तदानीं मृगयार्थमागताभ्यां ताभ्यां दृष्टः। ज्येष्ठेनैको हस्तो गृहीतः कनिष्ठेन द्वितीयो गृहीतः। परस्परं युद्धं कृत्वा द्वावपि मृतौ कस्यापि स्त्रीप्राप्तिरूपकार्यसिद्धिर्न जाता॥

मानत्वं बुद्धेर्लक्षणम् । सर्वे ये व्यवहारा आहारविहारादयस्तेष हेतुर्बुद्धिरित्यर्थः । सांख्यमते बुद्धिशब्दस्य महत्तत्ववाचकत्वा दन्तःकरणात्मकत्वाच्चाह **ज्ञानमिति** । तथाच मनोभिन्ना-न्तःकरणे मानाभावः । अथवा बुद्धिशब्दस्यायं बुद्धिमानि-त्यत्र ज्ञानविशेषे व्यवहारदर्शनात् किं ज्ञानविशेषो बुद्धिरत आह **ज्ञानमिति**। बुद्धिं विभजते **सेति** । बुद्धिरित्यर्थः। द्वै-विध्यं व्युत्पादयति **स्मृतिरिति** । स्मृतेर्लक्षणमाह **संस्का-रेति**। संस्कारध्वंसेऽतिव्याप्तिवारणाय **ज्ञानपदमिति**। अ-नुभवेऽतिव्याप्तिवारणाय **संस्कारेति** । तथापि प्रत्यभिज्ञाया-मतिव्याप्तिवारणाय संस्कारमात्रजन्यत्वं विवक्षणीयं क्वचित्त-थैव पाठः । नचैवं सत्यसंभवः, स्मृतेः संस्कारजन्यत्वे सति इ-न्द्रियार्थसन्निकर्षाजन्यत्वात् स्मृतित्वं च स्मरामीत्यनुभव-सिद्धो जातिविशेषः । **इति स्मृतिसामान्यनिरूपणम्** ।

अनुभवामीत्यनुभवसिद्धमनुभवत्वं प्रत्यक्षजातिरेव नत्वनुमि-त्यादिसाधारणं तत् तत्र तादृशप्रत्ययाभावादतोऽनुभवत्वं निर्वक्ति **तद्भिन्नमिति** । स्मृतित्वावच्छिन्नभिन्नमित्यर्थः । तेन यत्किंचित्स्मृतिभिन्नत्वस्यास्मृतौ सत्त्वेऽपि न क्षतिः । घटादि-वारणाय ज्ञानमिति । स्मृतिवारणाय तद्भिन्नमिति । **इत्यनुभ-वसामान्यनिरूपणम्** । अनुभवं विभजते **सेति** । यथार्था-नुभवं लक्षयति **तद्वतीति** । तद्वति तदेव प्रकारो यस्य स त-थेत्यर्थः । तद्वद्विशेष्यकं तत्प्रकारक इति यावत् । भवति चायं घट इति ज्ञानं घटत्ववद्धटविशेष्यकघटत्वप्रकारकं च । स्मृतिवा-रणायानुभव इति । अयथार्थानुभववारणाय तद्वतीति । **यथार्थ इति** । अनुभव इत्यनुषज्यते । घटे घटो नवेत्यांशिकसंशयोऽपि

घटत्वांशे प्रमैव । ननु रजते रजतत्वमिति प्रमायामव्याप्तिः तस्याः रजतप्रकारकत्वेऽपि विशेष्यीभूतरजतत्वे रजतस्यासत्त्वेन रजतवद्विशेष्यकत्वाभावादिति चेत्, तद्वति तत्प्रकारकत्वमित्यस्य तत्संबन्धवति तत्प्रकारकत्वमित्यर्थमनुसरामः । रजतत्वे रजतस्यासत्त्वेऽपि रजतस्याधेयतात्मकस्य संबन्धस्य सत्त्वेन रजतसंबन्धवति रजतत्वे रजतप्रकारकत्वं तादृशप्रमायामव्याहतमेव । ननु शास्त्रे प्रमापि श्रूयते सा किं यथार्थानुभवात्मिका बुद्धिः

**स एव प्रमेत्युच्यते ॥ तदभाववति तत्प्रकारकानुभवोऽयथार्थः । यथा शुक्ताविदं रजतमिति ज्ञानम् । यथार्थानुभवश्चतुर्विधः ।**

किं वा तदतिरिक्तेत्याशंक्य निरस्यति **सैव प्रमेत्युच्यते** । यथार्थानुभवात्मिका बुद्धिः सैव प्रमेत्युच्यत इत्यर्थः । इति **यथार्थानुभवसामान्यनिरूपणम्**। अयथार्थानुभवं लक्षयति **तदभाववतीति** । तदभाववद्विशेष्यकस्तत्प्रकारकानुभवोऽयथार्थ इत्यर्थः। यथा शुक्ताविदं रजतमिति ज्ञानं भवति हि रजतत्वाभाववच्छुक्तिविशेष्यकं रजतत्वप्रकारकं च । ननु वृक्षः कपिसंयोगीति प्रमायामतिव्याप्तिः तस्या मूलावच्छेदेन कपिसंयोगाभाववति वृक्षे कपिसंयोगप्रकारकत्वादिति चेन्न, तदभावावच्छेदकावच्छेदेन तत्प्रकारकत्वमिति तदर्थत्वात् । तादृशप्रमायां कपिसंयोगाभावावच्छेदकीभूतमूलावच्छेदेन कपिसंयोगप्रकारकत्वाभावेनातिव्याप्तिविरहात् । अत्र मीमांसकाः। अयथार्थज्ञानमेवाप्रसिद्धम् ।नच तस्याप्रसिद्धत्वे कथं तर्हि शुक्तौ रजतत्वप्रकारकविसंवादीच्छया रजतार्थिनो विसंवादिप्रवृत्तिरिति वाच्यं, पुरोवर्त्तिज्ञानरजतत्वस्मरणाभ्यामेव संभवादि-

त्याहुः । इदमकिंचित्करं तथासति नेदं रजतमिति बाधज्ञानादपि तदापत्तेः । उपस्थितेष्टभेदज्ञानाभाव एव विसंवादिप्रवृत्तौ बीजमिति चेन्न, सत्यरजतस्थले विशिष्टज्ञानस्यैव प्रवर्त्तकत्वस्य प्रामाणिकत्वेन लाघवात्तस्यैव सर्वत्र प्रवर्त्तकत्वौचित्यादित्यन्यथाख्यातिसिद्धेः । वाचस्पतिमिश्रास्तु । शुक्ताविदं रजतमिति ज्ञाने प्रसिद्धशुक्तिरजतत्वयोरलीक एव समवायो भासते इत्यसत्ख्यातिमङ्गीचक्रुः । नैतद्युक्तमसतो मानासंभवात् । इत्ययथार्थानुभवसामान्यनिरूपणम् । यथार्थानुभवं विभजते यथार्थानुभवश्चतुर्विध इति । यथार्थानुभवश्च प्रत्यक्षमेवेति चार्वाकाः । अनुमितिरपीति कणादबौद्धौ । उपमितिरपीति नैयायिकैकदेशिनः । अर्थापत्तिरपीति प्राभाकराः । अनुपलब्धिरपीति भाट्टवेदान्तिनौ । संभवैतिह्यकावपीति पौराणिकाः । चेष्टापीति तान्त्रिकाः एतेषां मतेऽस्वरसात्तस्य चातुर्विध्यं स्वयं दर्शितम् । अस्वरसबीजं तु स्फुटीभविष्यति ।

**प्रत्यक्षानुमित्युपमितिशाब्दभेदात् । तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् । व्यापारवदसाधारणं कारणं करणम् ।**

चातुर्विध्ये हेतुमाह प्रत्यक्षानुमित्युपमितिशाब्दभेदात् । इतिप्रमाविभागः । प्रसंगात्प्रमाणं विभजते तत्करणमपीति । यथार्थानुभवात्मकप्रमायाः करणमित्यर्थः । प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणम् । अनधिगतार्थगन्तृप्रमाणमिति मीमांसकास्तदसत् एकस्मिन्नेव घटे घटोऽयं घटोऽऽयं घटोऽयमिति धारावाहिकप्रत्ययस्थलेऽधिगतार्थगन्तृणामप्रामाण्यापत्तेः । चातुर्विध्ये हेतुमाह प्रत्यक्षानुमानो-

पमानेति । तथाच न्यायसूत्रं " प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति" इतिप्रमाणविभागः । प्रमाणज्ञानस्य करणज्ञानाधीनत्वादादौ करणं निर्वक्ति असाधारणमिति । असाधारणत्वं च फलायोगव्यवच्छिन्नं कारणं करणमिति मते फलायोगव्यवच्छिन्नम् । व्यापारवत्कारणं करणमिति मते फलायोगव्यवच्छिन्नलक्षणव्यापारवत्त्वं व्यापारश्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकः करणत्वस्य कारणत्वघटितत्वात्तज्जिज्ञासां निवारयितुं कारणत्वं

अनन्यथासिद्धिकार्यनियतपूर्ववृत्तिकारणम् कार्यंप्रागभावप्रतियोगि। कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः। कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणमसमवायिकारणं यथा तन्तुसंयोगः पटस्य तन्तुरूपं पटगतरूपस्य। तदुभयभिन्नं कारणं निमित्तकारणं यथा तुरीवेमादिकं पटस्य

विवेचयति अनन्यथासिद्धकार्येति । कार्यान्नियताऽवश्यंभाविनी पूर्ववृत्तिः पूर्वलक्षणवृत्तिर्यस्य तत्तथेत्यर्थः । अनियतरासभादिवारणाय नियतेति । कार्यवारणाय पूर्वेति । आरण्यस्थदण्डेऽपि स्वरूपयोगत्वसत्त्वाद्धटकारणत्वनिर्वाहः स्वरूपयोग्यत्वं च कारणतावच्छेदकधर्मवत्त्वं प्रकृते दण्डत्वमेव तथा इदं तु बोध्यं दण्डत्वादिवारणायानन्यथासिद्धत्व-

विशेषणस्यावश्यकत्वेन तत एव रासभादिवारणसंभवे नियतपदमनर्थकम् एवं चानन्यथासिद्धपूर्ववृत्तिकारणमिति फलितम् । ननु कार्यमेव किमित्याकांक्षायामाह कार्यमिति । अनन्यथासिद्धत्वं चान्यथासिद्धिशून्यत्वम् । अन्यथासिद्धिश्चावश्यकॢप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तत्सहभूतत्वं यथावश्यकॢप्तनियतपूर्ववर्त्तिभिः दण्डादिभिरेव घटरूपकार्यसंभवे तत्सहभूतत्वं दण्डत्वादौ अतस्तदन्यथासिद्धं केचित्तु अन्यत्रकॢप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धं यथा रूपप्रागभावशून्यस्थले कॢप्तनियतपूर्ववर्त्तिनो गन्धप्रागभावादेव पाकजस्थलेऽपि गन्धरूपकार्य्यसंभवे तद्भिन्नोरूपप्रागभावो गन्धप्रागभावेनान्यथासिद्ध इति वदन्ति । तदसत् दण्डत्वादेरन्यथासिद्धत्वानापत्तेः । अथ दण्ड एवान्यथासिद्धः किं न स्यादितिचेन्न, तस्य लाघवेन कारणत्वात् तच्च लाघवं त्रिविधं शरीरकृतमुपस्थितिकृतं संबन्धकृतं च । तत्राद्यं प्रत्यक्षे महत्त्वमनेकद्रव्यत्वापेक्षाया अनेकावयवजन्यद्रव्यत्वं वा । अनेकद्रव्यत्वं च पारिमाण्डिल्याभावविशिष्टद्रव्यत्वम् । द्वितीयं गन्धप्रागभावे तृतीयं च दण्डत्वापेक्षया साक्षात्संबन्धकृतं दण्डे इत्यलमप्रकृतविचारेण । ननु पञ्चमान्यथासिद्धिरेव कुतः प्रदर्शिता अन्या अपि चतस्रः सन्ति । तत्राद्या तु येन रूपेण पूर्ववृत्तित्वं कारणस्य तत्त्वं यथा घटं प्रति दण्डत्वस्य। द्वितीया च यस्य कारणमादायैवान्वयव्यतिरेकौ गृह्येते न तु स्वातन्त्र्येण तत्त्वं यथा घटं प्रति दण्डरूपस्य। तृतीया च यस्यान्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव क्वचित्पूर्ववृत्तित्वं गृह्यते तत्त्वं यथा घटं प्रत्याकाशस्य शब्दसमवायिकारणत्वेन रूपेण । चतुर्थी च यस्य कारणं प्रति पूर्ववृत्तित्वं गृहीत्वैव कार्य्यं प्रत्यपि वृत्तित्वं

गृह्यते तत्त्वं यथा घटं प्रति कुलालपितृत्वेन रूपेण कुलालपितुः कुलालत्वेन रूपेण तु कारणत्वमेवं तस्येति चेन्न, पञ्चमान्यथासिद्धेरेव सर्वत्र संभवेन तासामकिंचित्करत्वाद्बालधीवैशद्यार्थमेव स्फुरति चेत्स्यादेतत् । **यत्समवेतमिति** । यस्मिन्समवायसंबन्धेन वर्तमानं सदित्यर्थः । उदाहरति **यथा तन्तव इति** । स्वगतरूपादेरित्यत्रादिना गंधादेः परिग्रहः । ननु पटरूपं प्रति तन्तुरूपमसमवायिकारणं न स्यात्तयोः सामानाधिकरण्याभावात् समानाधिकरणयोरेव कार्य्यकारणभावनियमादतआह **कार्य्यैणेति** । **कारणेनेति** कार्य्यसमवायिकारणेनेत्यर्थः। तथाच पटरूपसमवायिकारणीभूतपटसामानाधिकरण्यस्य तंतुरूपे सत्त्वात्परंपरासंबंधेन पटरूपसामानाधिकरण्यमपि सुलभमेवेति भावः । परंपरासंबंधश्च स्वसमवायिसमवायः । समवायसंबंधेन कार्य्यसामानाधिकरण्यमेवं कार्य्यैकार्थप्रत्यासत्तिरित्युच्यते स्वसमवायिसमवायसंबंधेन कार्य्यसामानाधिकरण्यमेव कारणैकार्थप्रत्यासत्तिरित्युच्यते। तथाच समवायस्वसमवायिसमवायान्यतरसंबंधेन कार्य्येण सहैकस्मिन्नर्थे समवायेन प्रत्यासन्नत्वे सति आत्मविशेषगुणान्यत्वे सति कारणमसमवायिकारणमिति फलितोऽर्थः । नच तुरीतन्तुसंयोगादावतिव्याप्तिरिति वाच्यम्, तन्तुमात्रसमवेतत्वे सति पटकारणं पटासमवायिकारणमिति विशेषलक्षणस्य विवक्षितत्वात् । एवमन्यत्रापि । निमित्तकारणं लक्षयति **तदुभयेति** । इदं च कारणत्रयं भावकार्य्यस्यैव अभावस्य तु निमित्तमात्रम् । कारणलक्षणमुपसंहरति

**तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।**

**तदिति** । यस्मात्कारणात्कारणत्वघटकं कारणमुपदर्शितं तस्मा-

त्कारणादेतत्त्रिविधसाधकमध्ये यत्साधकतमं तदेव करणमित्यर्थः। इति करणप्रपञ्चः। करणप्रपञ्चं निरूप्य पूर्वोद्दिष्टप्रमाण-

**तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् ।**

विशेषणं लक्षणं वक्तुमुपन्यस्यति **तत्रेति**। तत्र प्रमाणचतुष्टयमध्ये साक्षात्कारप्रमाकरणं प्रत्यक्षं प्रत्यक्षप्रमाणमित्यर्थः। अनुमानवारणाय प्रत्यक्षेति। यद्यपि प्रमायाः प्रथमोद्दिष्टत्वात्तस्या एवादौ लक्षणं वक्तुमुचितं तथापि तस्याः प्रमाणोपजीवकत्वेन तदुपजीव्यप्रमाणलक्षणमेवादावुचितमिति भावः। तच्च क्वचिदिन्द्रियं क्वचिदिन्द्रियार्थसन्निकर्षः क्वचिज्ज्ञानम्। तत्राद्यं निर्विकल्पकज्ञाने। द्वितीयं सविकल्पकज्ञाने निर्विकल्पकज्ञानद्वारा इन्द्रियार्थसन्निकर्षः। तृतीयं च सविकल्पकज्ञानानन्तरम्। यत्र हानोपादानोपेक्षाबुद्धयो भवन्ति तत्र सविकल्पकज्ञानं द्वारीकृत्य निर्विकल्पज्ञानं हानं दुःखसाधनत्वज्ञानं यथा सर्पो मे दुःखसाधनमिति उपादानं च सुखसाधनत्वज्ञानं यथा स्रक्चन्दनवनितादिकं मत्सुखसाधनमिति उपेक्षाचोभयासाधनत्वज्ञानं यथा तृणादाविति व्यापारवतः करणत्ववादिनः। **इति प्रत्यक्षप्रमाणनिरूपणम्**। प्रत्यक्षप्रमां लक्षयति **इन्द्रियार्थेति**।इन्द्रियं चक्षुरादिकमर्थो घटादिस्तयोः सन्निकर्षः संयोगादिस्तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः।सन्निकर्षध्वंसवारणाय ज्ञानमिति। अनुमित्यादिवारणायेन्द्रियार्थसन्निकर्षेति। अथ काचादिव्यवहितपदार्थप्रत्यक्षेऽव्याप्तिरितिचेन्न, स्वच्छद्रव्यस्य तेजोऽनिरोधकत्वेन तदन्तश्चक्षुषः प्रवेशसंभवात्। अथ दर्पणे कथं मुखप्रत्यक्षमितिचेन्न, दर्पणप्राप्तचक्षुषैव परावृत्या मुखं प्राप्य प्रत्यक्षजननात्। क्वचित्स्वच्छद्रव्यस्यैव दोषवशादन्यथाभानं दर्पणे मुखं पश्यामीति धीस्तु भ्रम एव एतेन प्रतिबिम्बं परास्तम्। नचेश्वरप्रत्यक्षेऽव्याप्तिरिति वा-

च्यम्, अत्र जन्यप्रत्यक्षस्यैव लक्षितत्वात्। यदाह भगवान्सूत्रकारः "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति" अन्ये तु ज्ञानाकरणकं ज्ञानं प्रत्यक्षं इदं चेश्वरप्रत्यक्षसाधारणमिति। इति प्रत्यक्षप्रमाणनिरूप-

**तद्द्विविधं निर्विकल्पकं सविकल्पकं चेति। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकं यथेदं किंचित्। सप्रकारकं ज्ञानं सविकल्पकं यथा डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति।**

णम्। प्रत्यक्षप्रमां विभजते तद्द्विविधमिति। यथा किंचिदिदमितिनामजात्यादियोजनाहीनं वस्तुमात्रावगाहि ज्ञानमित्यर्थः। ननु निर्विकल्पके किं प्रमाणमिति चेन्न, अयं घट इति विशिष्टबुद्धिः विशेषणज्ञानजन्या विशिष्टबुद्धित्वात् किरीटीति विशिष्टबुद्धिवदित्यनुमानस्यैव हेतुत्वात्। अत्र घटत्वरूपं यद्विशेषणं तज्ज्ञानमेव निर्विकल्पकमित्युच्यते। नच विशेषणज्ञानमपि सविकल्पकमेवास्तामिति वाच्यम्, अनवस्थाप्रसङ्गात्। इति निर्विकल्पकनिरूपणम्॥ सविकल्पकं निरूपयति सप्रकारकमिति। विशिष्टज्ञानमित्यर्थः। अत्र नास्तिकाः। सविकल्पकं न प्रत्यक्षं तस्य घटत्वादिरूपालीकोपरक्तत्वात् वन्ध्यापुत्रज्ञानवत्। निर्विकल्पकं स्वलक्षणवस्तूपरक्तत्वात्स्यादेव प्रत्यक्षम्। नच किमुल्लेखनी अयं घटोऽयं घट इत्येकाकारा प्रतीतिर्भिन्नेषु विलक्षणेषु घटेषु अतः सर्वानुगतधर्म आवश्यक इति वाच्यं, तस्यातद्व्यावृत्त्यात्मत्वात्। अतद्व्यावृत्तिश्च तद्भिन्नभेदः स च तुच्छ एवेत्याहुः। तदसत्। विधिमुखेनैव एकाकारप्रतीतेः तस्य निषेधरूपत्वायोगात्। इति सविकल्पकनिरूपणम्। अथ प्रत्यक्षं षड्विधं घ्राणजरासनचाक्षुषश्रोत्रस्पार्शनमानसभेदात्। घ्राणजत्वादिकं

तु जिघ्रामि आस्वादयामि पश्यामि शृणोमि स्पृशामि मनसा सुखं साक्षात्करोमीत्यनुभवसाक्षिको जातिविशेषः। इति प्रत्य-

**प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः । संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायो विशेषणविशेष्यभावश्चेति ।**

क्षप्रमाविशेषनिरूपणम् । ननु प्रत्यक्षकारणीभूतेन्द्रियनिष्ठप्रत्यक्षसामानाधिकरण्यघटकसन्निकर्षः क इत्याकांक्षायां तं दर्शयितुं विभजते । प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः । संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति । प्रत्यक्षेति लौकिकप्रत्यक्षे इत्यर्थः । संयोगमुदाहरति सन्निकर्ष

**चक्षुषा घटप्रत्यक्षजनने संयोगसन्निकर्षः । घटरूपप्रत्यक्षजनने संयुक्तसमवायसन्निकर्षः चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।**

इति। चक्षुषेति। तथा द्रव्यचाक्षुषस्पार्शनमानसेषु संयोग एव सन्निकर्ष इति भावः। संयुक्तसमवायमुदाहरति घटरूपेति। चक्षुषा जननीय इत्यनुषज्यते। तथा च द्रव्यसमवेतचाक्षुषस्पार्शनमानसरासनघ्राणजेषु संयुक्तसमवाय एव सन्निकर्ष इति भावः। ननु घटरूपे कथं चक्षुषः संयुक्तसमवायोऽतस्तमुपपादयतिचक्षुः संयुक्त इति । ननु दूरस्थघटादौ सत्यपि संयुक्तसमवाये कुतः परिमाणाग्रहणमिति चेदत्राहुः परिमाणग्रहणे चतुष्टयसन्निकर्षोऽप्यधिकं कारणं स चेन्द्रियावयवार्थावयवयोरिन्द्रियावयव्यर्थावयविनोरिन्द्रियावयव्यर्थावयवयोरिन्द्रियाव-

यवार्थावयविनोश्च संयोग इति । इतरे तु दोषवशादेव न

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् ।

ग्रहणमिति वदन्ति। संयुक्तसमवेतसमवायमुदाहरति रूपत्वेति। रूपत्वात्मकं यत्सामान्यं तत्प्रत्यक्ष इत्यर्थः । अत्रापि चक्षुषा जननीय इति शेषः। तथा च द्रव्यसमवेतसमवेतचाक्षुषरासनघ्राणजस्पार्शनमानसेषु संयुक्तसमवेतसमवाय एव सन्निकर्ष इति भावः । अथ द्रव्यतत्समवेतप्रत्यक्षेऽपि संयुक्तसमवेतसमवाय एव सन्निकर्षोऽस्त्विति चेन्नैतत्, आत्मनोऽप्यन-

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वाद्गुणगुणिनोश्च समवायात्

ध्यक्षप्रसङ्गात्। समवायसन्निकर्षमुदाहरति श्रोत्रेणेति। शब्दसाक्षात्कारे जननीय इति शेषः। ननु श्रोत्रशब्दयोः कथं समवाय इत्यपेक्षमाणं प्रत्युपपादयति कर्णेति। अथ समवायस्य नित्यत्वेन शब्दप्रत्यक्षे को व्यापार इति चेच्छब्दः श्रोत्रमनः-

शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।

संयोगो वेति गृहाण। समवेतसमवायमुदाहरति शब्दत्वेति । विशेषणविशेष्यभावमुदाहरति विशेषणेति । विशेषणभावो

विशेष्यभाव इत्यर्थः । इन्द्रियसंबद्धविशेषणत्वमिन्द्रियसंबद्धविशेष्यत्वमिति यावत् । विशेषणतासन्निकर्षमुपपाद्य दर्शयति घटाभाववदिति । इह भूतले घटो नास्तीत्यादौ विशेष्यतासन्निकर्षोऽवसेयः सप्तम्यन्तस्य विशेषणत्वनियमात् । अत्रेदं बोध्यं । इन्द्रियसंयुक्तविशेषणतासंयुक्तसमवेतविशेषणतादिभेदेन तस्या नानात्वेऽपि विशेषणतात्वेन सा एकैव एवं विशेषणताविशेष्यतयोरन्यतरत्वेन ग्रहणमतो न सन्निकर्षषट्कत्वविरोधः । इति लौकिकसन्निकर्षविचारः । ननु विशेषणतासन्निकर्ष एव नास्ति अत एवाभावप्रत्यये योग्यानुपलब्धिः कारणमिति चेन्न, यद्यत्र घटः स्यात्तर्हि भूतलमिव दृश्यते अतो दर्शनाभावान्नास्तीति घटरूपप्रतियोगिसत्त्वप्रसक्त्या तर्कितो यो घटोपलंभः तत्प्रतियोगिताकाभावात्मकयोग्याऽनुपलब्धिसहकृतेन्द्रिये-

**अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः घटाभाववद्भूतलमित्यत्र चक्षुस्संयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।**

णैवाभावप्रत्ययसंभवेऽनुपलब्धेः कारणत्वस्यान्याय्यत्वात् । अभावाधिकरणप्रत्यक्षं प्रति इन्द्रियकरणत्वस्यावश्यकत्वेनाभावप्रत्यक्षं प्रत्यपि विशेषणतासन्निकर्षद्वारा तस्यैव करणत्वस्योचितत्वादित्यास्तां विस्तरः । इत्यनुपलब्धिवादः । इदानीमलौकिकसन्निकर्षो निरूप्यते । स त्रिविधः । सामान्यलक्षणो ज्ञानलक्षणो योगजधर्मलक्षणश्चेति । तत्राद्यः इन्द्रियसंबद्धविशेष्यज्ञानप्रकारीभूतघटत्वादिः भवति च घटत्वादिरिन्द्रियसंबद्धविशेष्यकेऽयं घट इति लौकिकप्रत्यक्षे प्रकारः तदनन्तरं तेन सन्निकर्षेण सर्वे घटा इत्यलौकिकप्रत्यक्षं जायते । नचेन्द्रियसंबद्धं सामान्यमेव प्रत्यासत्तिः मृगतृष्णादौ जलभ्रमानन्तरं

सकलजलज्ञानं न स्यात्, तत्रेन्द्रियजलत्वयोः संबन्धाभावात् मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यमेव प्रत्यासत्तिः अन्यथा परमाणुत्वेन यत्किंचित्परमाणूपस्थितौ परमाणुत्वसामान्यलक्षणया सकलपरमाणूल्लेखनी मानसप्रतीतिर्न स्यात्परमाणुमनसोः संबन्धाभावात्। द्वितीयो यथा। यत्र सौरभज्ञानलक्षणया चाक्षुषसामग्र्या च सुरभिचन्दनखण्डमिति सौरभांशेऽलौकिकं चन्दनखण्डांशे लौकिकं चाक्षुषं जायते तत्र सौरभज्ञाने सौरभस्मरणमेव प्रत्यासत्तिः सौरभांशे चक्षुःसन्निकर्षासंभवादित्यन्यत्र विस्तरः॥ तृतीयश्चादृष्टविशेष एव। स द्विविधः। युक्तयुंजानभेदाद्योगिनो द्वैविध्यं तत्र युक्तस्य योगिनः प्रथमप्रत्यासत्त्या निरन्तरमखिलपदार्थज्ञानं जायते। युञ्जानस्य चिंताविशेषसनाथद्वितीयप्रत्यासत्त्या समयविशेषे ज्ञानं जायते। इत्यलौकिकसन्निकर्षनिरूपणम्। ननु योगिसद्भावे किं प्रमाणमिति चेत् परमाण्वादिः जन्यप्रत्यक्षविषयः अभिधेयत्वात् घटवदित्यनुमानं गृहाण तत्प्रत्यक्षं तु नास्माकं किंतु

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियं तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

इति प्रत्यक्षखण्डः।

योगिनामेवेति॥ ध्येयम्। प्रत्यक्षप्रमामुपसंहरति एवमिति। उपदर्शितक्रमेणेत्यर्थः। ननु सिद्धान्ते प्रत्यक्षज्ञानकरणमिन्द्रियार्थसन्निकर्षः किं न स्यादत आह तत्करणमिन्द्रियमिति। प्रत्यक्षप्रमाणं निगमयति तस्मादिति। प्रत्यक्षप्रमाकरणत्वादित्यर्थः। सिद्धमिति सिद्धान्ते सिद्धमित्यर्थः। इति प्रत्यक्षप्र-

अनुमितिकरणमनुमानं परामर्शजन्यं ज्ञानमनुमितिः व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः। यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः ।

**माणम्** । प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावसंगतिमभिप्रेत्य प्रत्यक्षानंतरमनुमानं निरूपयति **अनुमितीति** । अनुमितेः करणमनुमानमित्यर्थः । तच्च लिङ्गपरामर्श एवेति निवेदयिष्यति। अथानुमितिः केत्यत आह **परेति** । प्रत्यक्षादिवारणाय जन्यान्तम्। परामर्शध्वंसवारणाय विशेष्यम् । तथापि परामर्शप्रत्यक्षेऽतिप्रसक्तिरितिचेन्मैवम्,साधनानवगाहित्वेनापि विशेषणीयत्वात् । नच तथा सति धूमवान् पर्वतो वह्निमानित्याकारकलिङ्गोपहितलैङ्गिकभानात्मकानुमितावव्याप्तिरिति वाच्यम्, तादृशानुमितेरस्वीकारात्।ननु स्थाणुर्वा पुरुषो वेति संशयानंतरं पुरुषत्वव्याप्यकरादिमानयमिति विशेषदर्शने सत्ययं पुरुष एवेति प्रत्यक्षोदयात् तत्रातिव्याप्तिरिति चेन्न, सामान्यविषयकप्रत्यक्षसामग्र्यभावसहकृतपरामर्शजन्यत्वस्येह विवक्षितत्वात् । सा च पक्षविशेष्यकपरामर्शात्पक्षविशेष्यिका पक्षप्रकारकपरामर्शात्पक्षप्रकारिका द्विविधादपि परामर्शात्पक्षविशेष्यकैवेत्यास्तां विस्तरः। इत्यनुमितिलक्षणम्। नन्वत्र परामर्शः क अतस्तं निर्वक्ति **व्याप्तीति** । विषयितासंबंधेन व्याप्तिविशिष्टं यत्पक्षधर्मताज्ञानं तदेव परामर्श इत्यर्थः।उदाहरति **यथेति**। तथा च वह्निव्याप्येत्यत्र व्याप्तेर्भानाद्धूमवानित्यत्र पक्षधर्मतायाभा-

नाऽवलत्येव व्याप्तिविषयकं पक्षधर्मताविषयकं चेति भावः। तावता परामर्शोऽवगतस्तज्जन्यत्वघटितलक्षणविशिष्टानुमितिः कीदृशी अतस्तामभिनयति तज्जन्यमिति। तदितिपरामर्शजन्यमित्यर्थः।**इति परामर्शनिरूपणम्**। अथ व्याप्तिविशिष्टेत्यत्रका व्याप्तिरित्याकांक्षायामाह यत्रेति। यत्र धूमस्तत्राग्निरिति व्याप्तेरभिनयः। साहचर्य्यनियम इति लक्षणम्। सहचरतीति सहचरस्तस्य भावः साहचर्य्यं सामानाधिकरण्यमित्यर्थः तस्य नियमो व्याप्तिः सचाव्यभिचरितत्वं तच्च व्यभिचाराभावः व्यभिचारश्च साध्याभाववद्वृत्तित्वं तथाच साध्याभाववदवृत्तित्वं व्याप्तिरिति पर्य्यवसन्नम्। वह्निमान् धूमादित्यादौ साध्यो वह्निस्तदभाववान् जलह्रदादिस्तद्वृत्तित्वं नौकादाववृत्तित्वं प्रकृतहेतुभूतधूमे इति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ साध्यो धूमस्तदभाववदयोगोलकं तद्वृत्तित्वमेव वह्नाविति नातिव्याप्तिः। नन्विदं वाच्यं ज्ञेयत्वादित्यादौ साध्याभावाप्रसिध्याऽव्याप्तिः। नच सोन्दडोपाध्यायैर्व्यधिकरणधर्मावच्छिन्नाभावस्योपगमेन तत्र वाच्यत्वाभावस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्याप्रसिद्धत्वेऽपि घटत्वेन वाच्यत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य प्रसिद्धत्वेन कथमव्याप्तिरिति शंक्यम्, चिन्तामणिकारेण तस्य खण्डितत्वात्। अङ्गीकारपक्षेऽपि तद्वदवृत्तित्वस्याप्रसिद्धेः। प्रकृते तस्यानुपयोगाच्चेति चेन्न,केवलान्वयिन्यनुमितेरस्वीकारात्। स्वीकारे तु भ्रमात्मिकैव सेति नव्याः। अत्रोच्यते हेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः। वह्निमान् धूमादित्यत्र हेतुर्धूमस्तत्समानाधिकरणात्यन्ताभावो घटात्यन्ताभावस्तत्प्रतियोगी घटोऽप्रतियोगी वह्निरूपं साध्यं तत्सामानाधिकरण्यं धूमे इति लक्षणसमन्वयः। धूमवान् वह्नेरित्यत्र नातिव्याप्तिः। हेतुर्वह्निस्तत्स-

मानाधिकरणात्यंताभावोऽयोगोलके धूमात्यंताभावस्तत्प्रतियोगि धूमरूपं साध्यमिति नातिव्याप्तिः । इदं वाच्यं ज्ञेयत्वादित्यादौ हेतुर्ज्ञेयत्वं तत्समानाधिकरणात्यंताभावो घटात्यंताभावस्तत्प्रतियोगी घटोऽप्रतियोगि वाच्यत्वरूपं साध्यं तत्सामानाधिकरण्यं ज्ञेयत्वे इति कृत्वा नाव्याप्तिः । अथ कपिसंयोगी एतद्वृक्षत्वादित्यत्र हेतुरेतद्वृक्षत्वं तत्समानाधिकरणात्यंताभावो मूलावच्छेदेन कपिसंयोगात्यंताभावस्तत्प्रतियोगि कपिसंयोगरूपं साध्यमित्यव्याप्तिरिति चेन्न, प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ताभावस्याभिमतत्वादित्यलं कर्कशवि-

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता । अनुमानं द्विविधं स्वार्थं परार्थं च । स्वार्थं स्वानुमितिहेतुः । परार्थं परप्रतिपत्तिहेतुः । तथाहि स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गत्वा तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति । तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात् पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम्

चारेण बालानाम् । इति व्याप्तिः । ननु ज्ञातेयं व्याप्तिः परन्तु

पक्षधर्मतेत्यत्र का नाम पक्षधर्मतेत्यपेक्षमाणं प्रति पक्षधर्मतास्वरूपं निरूपयति व्याप्यस्येति। व्याप्यो नाम व्याप्त्याश्रयः स च धूमादिरेव तस्य पर्वतादि निरूपितवृत्तित्वं पक्षधर्मतेत्यर्थः। इति पक्षधर्मता। अथ कथमनुमानमनुमितिकरणं कथं वा तस्मादनुमितेर्जनिरिति जिज्ञासायां लाघवादनुमानमुखेनैव बोधयितुमनुमानं विभजते **अनुमानमिति**। द्वैविध्यं दर्शयति **स्वार्थं परार्थं चेति**। स्वस्यार्थः प्रयोजनं यस्मात्तत्स्वार्थमिति समासः स्वप्रयोजनं च स्वस्यानुमेयपदार्थप्रतिपत्तिः एवं पक्षार्थमित्यस्यापि इदमेव तात्पर्यं मनसि निधाय स्वार्थानुमानं लक्षयति **स्वार्थमिति**। तदेवोपपादयितुं भूमिकां रचयति तथेति। **भूयोदर्शनेनेति**। धूमाग्न्योर्व्याप्तिग्रहे साध्यसाधनयोर्भूयः सहचारदर्शनेनेत्यर्थः। ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारज्ञानेऽपि वज्रादौ व्यभिचारोपलम्भेन कथमिदं व्याप्तिग्राहकमिति चेन्न, सहचारज्ञानपदेन व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्यैवाभिमतत्वात्। व्यभिचारज्ञानं द्विविधम् यथार्थमयथार्थं च। तदपि द्विविधम्। निश्चयः शंका च तद्विरहः क्वचित्तर्कात् यथा धूमवह्न्योर्व्याप्तिग्रहे धूमो वह्निव्यभिचारी न वेति शंकायां धूमो वह्निव्यभिचारीति निश्चये वा यदि धूमो वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादिति धूमवह्न्योः कार्य्यकारणभावभंगप्रसंगरूपतर्को यदि भवति तदैतस्मादेव तर्काद्व्यभिचारज्ञानं निवर्त्तते अतस्तत्र तर्कादेव व्यभिचारज्ञानविरहः क्वचित्स्वतःसिद्ध एव यथा यदा न धूमे व्यभिचारज्ञानं तदा यत्र धूमस्तत्राग्निरितिधूमत्वावच्छिन्नोऽग्नित्वावच्छिन्नव्याप्य इत्यर्थः।अथ देशांतरीयवह्निधूमानामिन्द्रियसन्निकर्षासंभवेन कथं धूमसामान्ये

वह्निसामान्यव्याप्तिग्रह इति चेन्न, धूमत्ववह्नित्वरूपसामान्यलक्षणप्रत्यासत्त्यैव सकलधूमवह्निज्ञानसंभवेन तत्र व्याप्तिग्रहस्यापि संभवात्।महानसादाविति।महानसाद्यवच्छेदेन धूम इत्यर्थः। तद्गते च पर्वतगते च चशब्दो वाक्यालंकारे। ननु परामर्शं प्रति व्याप्तिज्ञानस्य कारणत्वेन तत्पूर्वक्षणे पर्वतादौ महानसाद्यवच्छेदेन गृहीतव्याप्तेः कथं ज्ञानमत आह व्याप्तिं स्मरतीति। तथाच धूमदर्शनरूपोद्बोधकवशाद्व्याप्तिस्मरणं भवत्येव। तदनन्तरमिति।व्याप्तिस्मरणोत्तरक्षणे इत्यर्थः। अयमेव लिङ्गपरामर्श इत्युच्यते। अयमिति। व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम्। तच्च धूमादिस्तस्य परामर्शो ज्ञानविशेष इत्यर्थः। तस्मादिति लिंगपरामर्शादित्यर्थः।इतिस्वार्थानुमानम्।क्रमप्राप्तं परार्था-

यत्तु स्वयं धूमादग्निमनुमाय परम्प्रतिबोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। यथा पर्वतो वह्निमान् धूमवत्त्वात् यो यो धूमवान् स स वह्निमान् यथा महानसः तथाचायं तस्मात्तथेति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते।

नुमानं निरूपयति यत्त्विति। यत्पंचावयववाक्यं तत्परार्थानुमानमिति संबंधः। अथावयवत्वं नाम द्रव्यसमवायिकारणत्वं प्रतिज्ञादिषु तदभावात्कथमेतेऽवयवाः स्युरिति चेदनुमानवाक्यैकदेशत्वादवयवा इवावयवा इत्युपचर्यंत इति गृहाण। नन्वेवमपि पञ्चावयववाक्यस्यानुमानत्वमेव न विचारसहं तस्य लिङ्गपरामर्शत्वाभावादिति चेन्नैवम्, लिंगपरामर्शप्रयोजकं लिङ्गप्रति-

पादकत्वेनानुमानमित्युपचारात् तदुदाहरति यथेति। तथाचायमिति। अयं च पर्वतस्तथा वह्निव्याप्यधूमवानित्यर्थः। तस्मात्तथेति। वह्निव्याप्यधूमवत्त्वाद्वह्निमानित्यर्थः। अनेनेति। अनेन पञ्चावयववाक्येनेत्यर्थः। इति परार्थानुमानम्। ननु प-

**प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्वादिति हेतुः। यो यो धूमवान् सोऽग्निमान् यथा महानस इत्युदाहरणम्। तथाचायमित्युपनयः। तस्मात्तथेति निगमनम्। स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव कारणं तस्माल्लिङ्गपरमर्शोऽनुमानम्।**

ञ्चावयववाक्यमित्यत्र के ते पञ्चावयवा अतस्तान्दर्शयति प्रतिज्ञेति। प्रतिज्ञाद्यन्यतमत्वमवयवत्वम्। साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा। पञ्चम्यन्तं तृतीयान्तं वा लिङ्गवचनं हेतुः। व्याप्तिप्रतिपादकं दृष्टान्तवचनमुदाहरणम्। उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकं वचनमुपनयः। पक्षे साध्यस्याबाधितत्वप्रतिपादकं वचनं निगमनम्। इदमेव लक्षणं हृदि निधाय प्रतिज्ञादीन् विशिष्य दर्शयति पर्वतोऽग्निमानिति। इत्यवयवग्रन्थः। ज्ञायमानं लिङ्गमनुमितिकरणमिति वृद्धोक्तं न युक्तम्, इयं यज्ञशाला वह्निमत्यतीतधूमादित्यादौ लिङ्गाभावेऽप्यनुमितिदर्शनादित्यभिप्रायवाँल्लिङ्गपरामर्श एव करणमिति व्याचष्टे लिङ्गपरामर्श एवेति। अनुमानमुपसंहरति तस्मादिति। अनु-

मितिकरणत्वादित्यर्थः। अयमेव तृतीयज्ञानमित्युच्यते। तथाहि। महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादिमं पक्षे यद्धूमज्ञानं तद्द्वितीयम्। अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयम्। इदमेव लिङ्गपरामर्श इत्युच्यते। मीमांसकास्तु धूमवान् पर्वत इति पक्षधर्मताज्ञानमथ च वह्निव्याप्यो धूम इति व्याप्तिस्मरणमेतदुभयमेवानुमितिकरणं न तु लिङ्गपरामर्शोऽपि गौरवादित्याहुस्तन्न, द्रव्यवान् पर्वतो धूमो वह्निव्याप्य इति ज्ञानद्वयादनुमित्यापत्तेः द्रव्यत्वेन रूपेण धूमस्यैव भानात्। ननु व्याप्यतावच्छेदकरूपेणैव हेतोः पक्षवृत्तित्वज्ञानं विवक्षितमिति मा वद व्याप्यतावच्छेदकाननुसंधानेऽपि वह्निव्याप्यवान्पर्वत इति शब्दजन्यशाब्दपरामर्शादनुमित्यनुपपत्तेः। व्यापारवत्कारणं करणमिति मते व्याप्तिज्ञानमेवानुमानं लिङ्गपरामर्शो व्यापार इत्यवसेयम्। इत्यनुमानोपसंहारः। लिङ्गं विभजते लिङ्गमिति।

लिङ्गं त्रिविधम्। अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि यथा वह्नौ साध्ये धूमवत्त्वं यत्र धूमस्तत्राग्निर्यथा महानस इत्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः।

अन्वयव्यतिरेकिणो लक्षणमाह अन्वयेनेति। तृतीयायाः प्रयोज्यत्वमर्थः साध्यसाधनयोः साहचर्यमन्वयः तदभावयोः साहचर्यं व्यतिरेकः तथाचान्वयप्रयोज्यव्याप्तिमद्व्यतिरेकप्रयोज्यव्या-

प्तिमदन्वयव्यतिरेकीत्यर्थः। उदाहरति यथेति। धूमवत्त्वमिति धूमवत्त्वात्मकं लिङ्गमित्यर्थः। ननु कथमत्रान्वयव्याप्तिर्व्यतिरेकव्याप्तिश्च अतस्तां क्रमेणाभिनयति यत्रेति। तथाचान्वयव्याप्तिस्तूपदर्शितैव व्यतिरेकव्याप्तिश्च साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यवसेयमिति भावः। केचित्तु। साध्याभावसाधनाभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः। अन्यनिष्ठव्याप्त्या कथं साधनादनुमितिरितिचेत् साध्याभावव्यापकीभूताभावप्रतियोगित्वेन साधनस्य पक्षवृत्तित्वज्ञानं सहकारि। तदुक्तम्

व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते।
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते॥
अन्वये साधकं व्याप्यं साध्यं व्यापकमिष्यते।
साध्याभावोऽन्यथाऽव्याप्यो व्यापकः साधनात्ययः॥

इत्याहुः। अन्वयदृष्टान्तस्य स्फुटतरत्वाद् व्यतिरेकदृष्टान्तं दर्शयति यथेति। यद्यप्यन्वयव्याप्तेः प्राग्दर्शितत्वात्पुनस्तद्दर्शनमनुचितं तथापि तदानीं तस्यास्तत्त्वेनाप्रदर्शितत्वान्न दोषः।

अन्वयमात्रव्याप्तिकं केवलान्वयि यथा घटोऽभिधेयः प्रमेयत्वात् अत्र प्रमेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वादभिधेयत्वाच्च। व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वाद्। यदितरेभ्यो न भिद्यते

इत्यन्वयव्यतिरेकिग्रन्थः। केवलान्वयिनो लक्षणमाह अन्वयेति। अन्वयेनैव व्याप्तिर्यस्मिन्स तथेति उदाहरति यथेति। प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं निराकरोति अभि-

धेयत्वसाधनानुमाने इत्यर्थः। ननु कुतस्तन्निषेधोऽतस्तत्र हेतुमाह सर्वस्येति।पदार्थमात्रस्येत्यर्थः। तथा च सकलपदार्थाभिधेयत्वस्येश्वरप्रमाविषयत्वस्य चात्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वेन तदभावाप्रसिध्या तद्घटितव्यतिरेकव्याप्तिर्न संभवत्येवेति भावः । इति केवलान्वयिग्रन्थः । केवलव्यतिरेकिणो

न तद्गन्धवत् यथा जलम् । नचेयं तथा तस्मान्न तथेति । अत्र यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ।

लक्षणमाह केवलव्यतिरेकीति।पूर्ववत्समासः।उदाहरति यथेति।नचेयं तथेति।इयं पृथिवी न तथा न गन्धाभाववतीत्यर्थः। तस्मान्नतथेति।गन्धाभाववत्त्वाभावादितरभेदाभाववती नेत्यर्थः । नन्वत्र किमिति नान्वयव्याप्तिरित्याशंक्य परिहरति अत्रेति। इतरभेदसाधकानुमाने इत्यर्थः।इदमुपलक्षणं जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यन्नैवं तन्नैवं यथा घटः प्रत्यक्षादिकं प्रमाणमिति व्यवहर्त्तव्यं प्रमाकरणत्वात् यन्नैवं तन्नैवं यथा प्रत्यक्षाभासः विवादास्पदमाकाशमितिव्यवहर्त्तव्यं शब्दवत्त्वादित्यादिकमपि केवलव्यतिरेकीति द्रष्टव्यम् । अथेतरभेदः प्रसिद्धो न वा। नाद्यः यत्र प्रसिद्धस्तत्र गन्धवत्त्वस्यापि सत्त्वे कुतोऽयमस्मच्छिरसि क्षीराभिषेकः तदधिकरणस्यैवान्वयदृष्टान्तत्वेन केवलव्यतिरेकित्वव्याघातात् यदि तत्र नास्ति गन्धवत्त्वं तदा तस्यासाधारणत्वापत्तिः । न द्वितीयः विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेन पृथिवीतरभेदवतीति साध्यविशिष्टानुमित्यनुत्पत्तेः विशेषणीभूतेतरभेदस्याप्रसिद्ध्या तज्ज्ञानस्याप्यप्रसिद्धेः । नच

केवलमिदमेव दूषणं, व्यतिरेकव्याप्तिज्ञानस्याप्यसंभवेन दूषणान्तरस्यापि जागरूकत्वात्। कथं तदसंभव इति चेन्न, तज्जनकेतरभेदाभावज्ञानस्यायोगात्। स एव कुत इति चेन्न, तादृशकारणीभूतेतरभेदज्ञानाप्रसिद्धेः। नच वक्तव्यं कथं तत्तत्र कारणमिति अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वादिति मावह गर्वम्। जलभेदस्य तेजसि तेजोभेदस्य जले इति रीत्येतरभेदस्य प्रत्येकाधिकरणप्रसिद्ध्या पृथिव्यां तत्पटलस्य साधनीयतया तद्विशिष्टानुमितिसंभवात्सुतरां व्यतिरेकव्याप्तिज्ञानमपि संभवति इतरभेदपटलस्य पक्षातिरिक्तेऽप्रसिद्धत्वेन नान्वयदृष्टान्तश्च। अत एव नासाधारण्यमपीति कृतं पल्लवितेन। अत्रेदं बोध्यम्, अन्वयव्यतिरेकि तु पञ्चरूपोपपन्नं तानि कानीतिचेच्छ्रूयताम्। पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति। अबाधितः साध्यरूपविषयो यस्य तत्तथा तस्य भावस्तत्त्वं साध्याभावसाधकं हेत्वन्तरं सत्प्रतिपक्ष इत्युच्यते। स एव नास्ति यस्य सोऽसत्प्रतिपक्षस्तस्य भावस्तत्त्वमिति बोध्यम्। केवलान्वयि तु चतूरूपोपपन्नमेव। स्वसाध्यं साधयितुं क्षमते तस्य विपक्षविपर्ययेण तद्व्यावृत्तिविपर्ययात् केवलव्यतिरेक्यपि तथा। तस्य सपक्षविपर्ययेण तत्सत्त्वविपर्ययादिति। इति केवलव्यतिरेकिग्रन्थः। अत्र पृथिवीमात्रस्य पक्षत्वादित्यत्र का नाम पक्षता अतस्तां निर्वक्ति

संदिग्धसाध्यवान्पक्षः यथा धूमवत्त्वे हेतौ पर्वतः। निश्चितसाध्यवान् सपक्षः यथा तत्रैव महानसः। निश्चितसाध्याभाववान् विपक्षः यथा तत्रैव महाह्रदः।

संदिग्धेति । अथ यत्र घनगर्ज्जितेन मेघानुमितिस्तत्राव्याप्तिर्वह्निप्रत्यक्षकालीनवह्न्यनुमितिर्मे जायतामित्यनुमित्साजन्यानुमितिस्थले च तत्र संदिग्धसाध्यस्याभावादिति चेन्न, एतन्मते तत्रानुमितेरस्वीकारात् । तदुक्तं नानुपलब्धेन निर्णीतेऽर्थे न्यायः प्रवर्त्तते अपि तु संदिग्धार्थ एवेति । अथवा सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता । साधयितुमिच्छा सिषाधयिषा तस्या विरहोऽभावस्तद्विशिष्टा या सिद्धिः साध्यनिश्चयस्तदभाव एव पक्षतेति तदर्थः । अस्ति च वह्न्यनुमितिप्राक्क्षणे पर्वते तदानीं सिषाधयिषायाः सिद्धेश्चाभावात् अभावमात्रं न पक्षता पर्वते वह्निमनुमिनुयामिति सिषाधयिषाशून्यकाले सिद्धिसत्त्वेऽप्यनुमित्यापत्तेः तदानीं यत्किंचिदभावस्य सत्त्वात् । अस्तु च सिद्ध्यभाव एव नेति चेत् पर्वते वह्न्यनुमितिर्मे भूयादितीच्छाकाले सिद्धिसत्त्वेऽप्यनुमितिर्जायते सा न स्यात् तदानीं सिद्ध्यभावाभावात् ॥ अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धावावश्यकम् । तथाचानुमितौ सिषाधयिषोत्तेजिका तद्विरहविशिष्टसिद्धिरेव प्रतिबंधिका तदभाव एव कारणमिति फलितमिति दिक् । इति पक्षताग्रन्थः । प्रसंगात्सपक्षविपक्षौ क्रमेण निरूपयति निश्चितेति । तत्रैवेति । धूमवत्त्वे हेतावेवेत्यर्थः । एवमग्रेऽपि । इति सपक्षविपक्षनिरूपणम् ।

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्चहेत्वाभासाः । सव्यभिचारोऽनैकान्तिकः । स त्रिविधः । साधारणासाधारणानुपसंहारिभेदात् । तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः यथा पर्वतो वह्निमान् प्रमेय-

त्वादिति प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् । सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः यथा शब्दो नित्यः शब्दत्वादिति शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति। अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी यथा सर्वमनित्यं प्रमेयत्वादिति अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति ।

हेतून्निरूप्य प्रसङ्गाद्धेत्वाभासान्निरूपयति सव्यभिचारेति। उपदर्शितरूपाणां मध्ये कतिपयरूपोपपन्नत्वाद्धेतुवदाभासंते इति हेत्वाभासाः। तत्त्वं चानुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वम् । बाधस्थले वह्निरनुष्ण इत्यनुमितिप्रतिबन्धकं यज्ज्ञानमुष्णत्ववद्वह्नावनुष्णत्वसाधकं द्रव्यत्वमित्याकारकं तद्विषयत्वस्य द्रव्यत्वरूपहेत्त्वाभासे सत्त्वाल्लक्षणसमन्वयः।इत्थमसाधारणविरुद्धसत्प्रतिपक्षज्ञानस्यापि साक्षादनुमितिप्रतिबन्धकत्वं बोध्यम् । बाधश्च साध्याभावस्तद्विशिष्टः पक्षो वा वह्निमान्प्रमेयत्वादित्यादौ व्यभिचारिणि पर्वतो वह्निमानित्याद्यनुमितिकरणम् वह्निव्याप्यं प्रमेयत्वमित्यादिज्ञानं तत्प्रतिबन्धकत्वं च वह्न्यभाववद्वृत्तिप्रमेयत्वमित्यादिज्ञाने तद्विषयत्वस्य प्रमेयत्वादौ सत्वाल्लक्षणसमन्वयः।इत्थमनुपसंहारिप्रभृतिज्ञानानामनुमितिकरणप्रतिबन्धकत्वं बोध्यम् । बाधभ्रममादाय सद्धेतुवारणाय यथार्थेतीति दिक् । इति हेत्वाभाससामान्यनिरूपणम् । बालान्बोधयितुं प्राचीनसंकेतमपि दर्शयति अनेकान्तिक इति। उ-

च्यते इति शेषः । तत्त्वं च साधारणाद्यन्यतमत्वम् । विभजते स-
त्रिविध इति । साधारणं लक्षयति तत्रेति । साधारणादित्रि-
तयमध्य इत्यर्थः । उदाहरति यथेति । ननु प्रमेयत्वस्य कथं सा-
ध्याभाववद्वृत्तित्वम् । तदुपपादयति प्रमेयत्वस्येति । अथ वि-
रुद्धेऽतिप्रसक्तिरिति तन्न सपक्षवृत्तित्वस्यापि निवेशात् । अथैवम-
पि स्वरूपासिद्धेर्दूषणं जागर्तीति मा वह गर्वम् पक्षवृत्तित्वस्यापि
तथात्वात् । असाधारणं लक्षयति सर्वेति । सर्वे ये सपक्षवि-
पक्षास्तेभ्यो व्यावर्त्तते निवर्त्तत इति व्यावृत्त उदाहरति य-
थेति । उपपादयति शब्दत्वंहीति । नित्येभ्य इति आकाशा-
दिभ्य इत्यर्थः । अनित्येभ्य इति घटपटादिभ्य इत्यर्थः । अत्रा-
काशादिः सपक्षो घटादिर्विपक्ष इति बोध्यम् । अनुपसंहारिणं
लक्षयति अत्रेति । उपदर्शितानुमाने इत्यर्थः । इति व्यभि-

साध्याभावव्याप्यो हेतुर्विरुद्धः यथा शब्दो
नित्यः कृतकत्वादिति कृतकत्वं हि नि-
त्यत्वाभावेनानित्यत्वेन व्याप्तम् । साध्या-
भावसाधकं हेत्वन्तरं यस्य स सत्प्र-
तिपक्षः यथा शब्दो नित्यः श्रावणत्वात्
शब्दत्ववदिति । शब्दोऽनित्यः कार्यत्वात्

चारनिरूपणम् । विरुद्धं लक्षयति साध्येति । कृतकत्वादि-
ति । कार्यत्वादित्यर्थः । अनित्यत्वेन व्याप्तमिति । यद्यत्कृतकं
तत्तदनित्यमिति । व्याप्तिर्भवत्येवेति भावः । इति विरुद्धनि० ।
सत्प्रतिपक्षं लक्षयति यस्येति । यस्य हेतोः साध्याभावसाधकं
साध्याभावानुमापकं हेत्वन्तरं प्रतिपक्षो हेतुर्विद्यते स हेतुः

सत्प्रतिपक्ष इत्यर्थः। अयमेव प्रकरणसम इत्युच्यते। इति सत्प्रति-

घटवदिति। असिद्धस्त्रिविधः। आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् अत्र गगनारविन्दमाश्रयः स च नास्त्येव। स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात् अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्।

पक्षनि०। असिद्धं विभजते असिद्ध इति। आश्रयासिद्धाद्यन्यतमत्वमसिद्धत्वम्। त्रैविध्यं दर्शयति आश्रयासिद्ध इति। आश्रयासिद्धत्वं च पक्षतावच्छेदकाभावकत्वम्। भवति हि अरविन्दं गगनीयत्वरूपपक्षतावच्छेदकाभावकम्। अरविन्दरूपपक्षे गगनीयत्वस्य विरहात्। आश्रयासिद्धमुदाहरति यथेति। ननु कथमरविन्दे गगनीयत्वविरहः अत आह अत्रेति। उपदर्शितानुमाने इत्यर्थः। स्वरूपासिद्धमुदाहरति स्वरूपासिद्धेति। पक्षावृत्तित्वं स्वरूपासिद्धत्वमिदमेव लक्षणं मनसि निधायोपपादयति अत्रेति। उक्तानुमाने इत्यर्थः।तथा चाक्षुषत्वं शब्दे नास्तीत्यनेन चाक्षुषत्वे पक्षावृत्तित्वमर्थादायातमिति भावः। अथ शब्दे कुतो न चाक्षुषत्वमत आह शब्दस्येति। सोऽयं स्वरूपासिद्धः शुद्धासिद्धभागासिद्धविशेषणासिद्धविशेष्यासिद्धभेदेन बहुविधः। तत्राद्यस्तूपदर्शित एव। द्वितीयो यथा रूपादिचतुष्टयं गुणो रूपत्वात्। अत्र रूपत्वहेतोः पक्षैकदेशावृत्तित्वेन भा-

गे स्वरूपासिद्धत्वम् । तृतीयो यथा वायुः प्रत्यक्षो रूपवत्त्वे सति स्पर्शवत्त्वात् अत्र रूपवत्त्वविशेषणस्य वायावप्रवृत्तेस्तद्विशिष्टस्पर्शवत्त्वस्यापि तथात्वेन तस्य स्वरूपासिद्धत्वं विशेषणाभावे विशिष्टस्याप्यभावात् । तुरीयो यथा अत्रैव विशेषणविशेष्यवैपरीत्येन हेतुः तस्य स्वरूपासिद्धत्वं तु विशेष्याभावप्रयुक्तविशिष्टाभावादिति बोध्यम् ।

सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । पर्वतो धूमवान् वह्निमत्त्वादित्यत्र आर्द्रेन्धनसंयोग उपाधिः । तथाहि । यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता ।

व्याप्यत्वासिद्धं निरूपयति सोपाधिक इति । ननु कोऽयमुपाधिरत आह साध्येति । ननु किं तर्हि साध्यव्यापकत्वं साधनाव्यापकत्वं च । अतस्तत्क्रमेण दर्शयति साध्येति । लक्ष्ये लक्षणं योजयति यत्रेति । उपाधिभेदमादायासंभववारणाय व्यापकत्वशरीरेऽत्यंतपदम् । साधनभेदमादाय साधनस्योपाधित्ववारणाय व्यापकत्वशरीरेऽत्यन्तपदमावश्यकम् । उपाधिमुपसंहरति एवमिति । उक्तरीत्येत्यर्थः । सोऽयमुपाधिस्त्रिविधः । केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चेति । तत्राद्यस्तूपदर्शित एव क्रत्वन्तर्वर्तिनी हिंसाऽधर्मसाधनं हिंसा

त्वात्क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः तस्य यत्राधर्मसाधनत्वं तत्र निषिद्धत्वमिति साध्यव्यापकता यत्र हिंसात्वं तत्र न निषिद्धत्वमिति साधनाव्यापकता च क्रतुहिंसायां निषिद्धत्वस्याभावात्। न हिंस्यात्सर्वा भूतानि इति सामान्यवाक्यतः पशुना यजेतेत्यादि विशेषवाक्यस्य बलीयस्त्वात्। अत एव हिंसात्वं नाधर्मसाधनत्वे प्रयोजकमपि तु निषिद्धत्वमेवेत्यादिकमपि द्रष्टव्यम्। द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वमुपाधिः। तस्य यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वं रूपे व्यभिचारात् किन्तु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदवच्छिन्नबहिः प्रत्यक्षत्वं यत्र तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव। आत्मनि व्यभिचारणाय बहिःपदम्। यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्र नोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं च वायावुद्भूतरूपवत्त्वस्य विरहात्। तृतीयो यथा प्रागभावोऽपि विनाशी जन्यत्वादित्यत्र

यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः।

भावत्वमुपाधिः। तस्य यत्र विनाशित्वं तत्र भावत्वमिति न केवलसाध्यव्यापकत्वमस्ति प्रागभावे भावत्वविरहात् किं तु जन्यत्वरूपसाधनावच्छिन्नविनाशित्वं यत्र तत्र भावत्वमिति साधनावच्छिन्नसाध्यव्यापकत्वमेवास्ति यत्र जन्यत्वं तत्र न भावत्वमिति साधनाव्यापकत्वं च ध्वंसे भावत्वविरहात् एवं स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वमुपाधिः श्याम-

त्वस्य नीलघटेऽपि सत्वान्न केवलसाध्यव्यापकत्वं किं तु साधनावच्छिन्नसाध्यव्यापकत्वमेव अष्टमपुत्रे शाकपाकजत्वविरहेण साधनाव्यापकत्वं चेत्यादिकमपि द्रष्टव्यम्। अथ वह्निमान् धूमादित्यत्र महानसत्वाभावोऽप्युपाधिः स्यात् तस्य महानसान्यत्वलक्षणपक्षधमार्वच्छिन्नसाध्यव्यापकत्वादिति चेन्न, पक्षधर्मेत्यत्र पक्षदृष्टान्तोभयसाधारणधर्मस्यैव विवक्षितत्वात्। अथ तर्हि गतमुपाधिलक्षणमिदमितिचेन्न, निरवच्छिन्नसाध्यपक्षदृष्टान्तोभयसाधारणधर्मसाधनान्यतरावच्छिन्नसाध्यान्यतरव्यापकत्वे सति साधनाव्यापक उपाधिरिति तस्य परिष्करणीयत्वात्। इदं च लक्षणमाचार्याणामेवाभिमतम् लक्षणान्तरं तु ग्रंथान्तरे द्रष्टव्यम्। इत्युपाधिः। नन्वेवं तावतोपाधिरवगतः किं तर्हि व्याप्यत्वासिद्धमतआह वह्निमत्त्वमिति । तस्य व्याप्यत्वासिद्ध-

सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम् । यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः यथा वह्निरनुष्णो द्रव्यत्वादिति अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम् । व्याख्यातमनुमानम्। उपमितिकरणमुपमानम्। संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः तत्करणं सादृश्यज्ञानम्

त्वे हेतुमाह सोपाधिकत्वादिति । इत्थमुपदर्शितहेतवोऽपि द्रष्टव्याः। इत्यसिद्धनि० । बाधितं लक्षयति यस्येति। अयमेव कालात्ययापदिष्ट इत्युच्यते। स्पर्शनेनेति त्वगिन्द्रियेणेत्यर्थः। एवं

घटः क्षणिकः सत्त्वादित्यादिरपि बाधितः तत्र सोऽयं घट इतिप्रत्यभिज्ञानरूपप्रत्यक्षेण क्षणिकत्वलक्षणसाध्याभावस्य परिच्छिन्नत्वात्। इतिबाधितः। दुष्टलक्षणमपि हेत्वाभास एव यथातिप्रसक्तलक्षणं व्याप्यत्वासिद्धेऽन्तर्भवति अत्र साधारणधर्म एवोपाधिः। अव्याप्तलक्षणं तु भागासिद्धेऽन्तर्भवति। असंभवग्रस्तलक्षणं तु स्वरूपासिद्धेऽन्तर्भवति। सिद्धसाधनं त्वाश्रयासिद्धेऽन्तर्भवति। संदिग्धसाध्यवत एवाश्रयत्वात् नव्यास्तु सिद्धसाधनं निग्रहस्थानेऽन्तर्भवतीतिवदंति। इतितर्कसंग्रहव्याख्यानेऽनुमानपरिच्छेदः। अवसरसंगतिमभिप्रेत्यानुमानानंतरमुपमानं निरूपयति उपमितीति। उपमितेः करणमुपमानमित्यर्थः। तच्च सादृश्यज्ञानमिति निवेदयिष्यति। ननूपमितिरेव केत्यतआह संज्ञेति। संज्ञा च पदं संज्ञीचार्थस्तयोः संबंधो वाच्यत्वं तत्तत्प्रकारकोऽयं गवयपदवाच्य इति ज्ञानमुपमितिरित्यर्थः। उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशेषः। ननूपमितिकरणमुपमानमित्युक्तं किं तदत आह तत्करणं सादृश्यज्ञानमिति सादृश्यप्रकारकज्ञानमित्यर्थः। उपमितिकरणत्वं तस्य तस्य प्रतिपादयितुं प्रतिजानीते तथाहीति वाक्यार्थं स्मरन् गोसदृशं पश्यतीति गोसदृशं पश्यन्नतिदेशवाक्यार्थं स्मरतीत्यर्थः। अयं गवयपदवाच्य इत्यभिप्रेतगवयो गवयपदवाच्य इत्यर्थः। तेन गवयान्तरे शक्तिग्रहाभावप्रसङ्ग इति परास्तम्। तथाच गोसादृश्यविशिष्टपिण्डज्ञानं करणमतिदेशवाक्यार्थस्मरणं व्यापार उपमितिः फलमिति सारम्। तच्चोपमानं त्रिविधम्। सादृश्यविशिष्टपिण्डज्ञानमसाधारणधर्मविशिष्टपिण्डज्ञानं वैधर्म्यविशिष्टपिण्डज्ञानं च। तत्राद्यमुक्तमेव। द्वितीयं यथा खड्गमृगः कीदृगिति पृष्टे नासिकालसदेकशृंगोऽतिक्रा-

न्तगजाकृतिश्चेति तज्ज्ञातृभ्यः श्रुत्वा कालान्तरे तादृशपिण्डं

अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । तथाहि । गवयशब्दवाच्यमजानन् कुतश्चि-दारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशपिण्डं पश्यति तदनन्तरं—असौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते । व्याख्यातमुपमानम् ।

पश्यन्नतिदेशवाक्यार्थं स्मरति तदनन्तरं खड्गः खड्गपदवाच्य इत्युपमितिस्तूत्पद्यते । अत्र नासिकालसदेकशृंग इत्यसाधारणधर्मः । तृतीयं यथा उष्ट्रः कीदृगिति पृष्टेनाश्वादिवत्समानपृष्ठोऽह्रस्वग्रीवशरीर इत्याप्तोदिते कालान्तरे तत्तत्पिण्डदर्शनाद्वैधर्म्यविशिष्टपिण्डज्ञानं ततोऽतिदेशवाक्यार्थस्मरणं तत उष्ट्रः उष्ट्रपदवाच्य इत्युपमितिरुत्पद्यते इत्याहुः । नन्वाप्तवाक्यजन्यत्वाच्छाब्दबोध एवास्त्वितिचेन्न, उपमिनोमीत्यनुव्यवसायस्यापलापप्रसंगादिति सर्वं रमणीयम् । इति तर्कसंग्रहव्याख्याने उपमानपरिच्छेदः । अवसरसंगतिमभिप्रेत्योपमानानन्तरं

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः । यथा गामानयेति शक्तं पदम् । अस्मात्पदादयमर्थो बोद्धव्य इति ईश्वरेच्छासंकेतः शक्तिः ।

निरूपयति आप्तेति । शब्देति शब्दप्रमाणमित्यर्थः । भ्रान्तविप्रलंभकयोर्वाक्यस्य शब्दप्रमाणत्ववारणायाप्तेति । ननु कोऽय-

माप्तोऽत आह आप्तस्त्विति। यथाभूताबाधितार्थोपदेष्टा। ननु वाक्यं किमत आह वाक्यमिति पदं लक्षयति शक्तमिति निरूपकतासंबन्धेन शक्तिविशिष्टमित्यर्थः। इति पदसामान्यनि० ननु शक्तिरेव केत्यत आह अस्मात्पदादिति घटपदाद्धटपदार्थो बोद्धव्य इतीश्वरेच्छैव शक्तिरित्यर्थः। अर्थस्मृत्यनुकूलपदपदार्थसंबन्धत्वं शक्तित्वम्। सा च पदार्थान्तरमेवेति मीमांसकास्तन्न मानाभावात्। आधुनिके नाम्नि एकादशेऽह्नि पिता नाम कुर्यादितीश्वरेच्छास्त्येव। नव्यास्तु। आधुनिकसंकेतितडित्थादिपदे ईश्वरेच्छाया अभावादिच्छैव शक्तिरिति भणन्ति। शक्तिग्रहश्च वृद्धव्यवहाराद्भवति यथोत्तमवृद्धेन घटमानयेति वाक्ये प्रयुक्ते मध्यमवृद्धो घटमानयति तदवलोक्य व्युत्पित्सुर्बालोऽन्वयव्यतिरेकाभ्यां घटमानयेति वाक्यजन्यत्वं मध्यमप्रवृत्तिजनकज्ञाने निश्चिनोति ततो गामानय घटं नयेति वाक्यान्तरं शृण्वन्नावापोद्वापाभ्यां घटपदस्य घटत्वविशिष्टे शक्तिः गोपदस्य गोत्वविशिष्टे शक्तिरिति गृह्यते। एवमसति बाधके धातुप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति क्वचिदुपमानादपि तदुक्तम्।

"शक्तिग्रहो व्याकरणोपमान—
कोशाप्तवाक्यात् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सांनिध्यतः सिद्धपदस्य वृद्धाः" इति।

यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे

वसन्ते सर्वसस्यानां जायते यत्र शातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥

इति वाक्यशेषाच्छक्तिरवधार्यते। हस्ती घूर्णतीत्यस्य

गजो घूर्णतीति विवरणेन हस्तिपदस्य गजे शक्तिग्रहः । विवरणं च समानार्थबोधकपदान्तरेण तदर्थकथनमिदमेव विवृत्तिरित्युच्यते इह विकचसरोरुहे भ्रमर इत्यादौ प्रसिद्धपदसांनिध्याद्भ्रमरे शक्तिग्रहः । शेषं सुगमम् । नव्यास्तु गवादिपदानां व्यक्तावेव शक्तिर्नतु जातावपि गौरवादिति मेनिरे । मीमांसकास्तु विशेषणत्वेन गोत्वादेरेव प्रथममुपस्थितत्वाद्गवादिपदानां गोत्वादावेव शक्तिः व्यक्तिलाभस्तु गोत्वं ह्याश्रयं विनानुपपन्नमित्याक्षेपादित्याहुः। तदसत् । विनाप्याक्षेपं गौश्चरतीत्यनेन व्यक्तिप्रतीतेः । प्राभाकरास्तु गवादिशब्दानामानयनादिरूपकार्यान्विते गवादौ शक्तिः सर्वत्र कार्यवाक्यादेव व्युत्पत्तेः—भूतले घट इत्यादिसिद्धवाक्यं तु न व्युत्पत्तिरित्याहुः।तदसत्।इह कोऽयं पुर्यां सकलमनोरथदायिनीं करुणां वेत्ति इति सिद्धवाक्येऽपि पामराणां व्युपत्तिदर्शनात् । चैत्रःपचतीत्यादावाख्यानस्य कर्तरि शक्तिरिति वैयाकरणास्तत्र गौरवात् किंतु कृतावेव । तथा च गवादिशक्तिग्रहे गृहीतशक्तिकगवादिशब्दस्तज्ज्ञानं करणं पदजन्यपदार्थस्मरणं व्यापारः आकांक्षायोग्यतासत्तितात्पर्यज्ञानानि सहकारीणि शाब्दबोधः फलमिति सारम् । इति शब्दशक्तिनि० पदं चतुर्विधं यौगिकं रूढं योगरूढं यौगिकरूढं च । अवयवशक्तिर्योगः । अवयवमात्रशक्तिकं यौगिकं यथा पाचकादिपदम् समुदायशक्तिः रूढिः समुदायमात्रशक्तिकं रूढं यथा गोपदम् अवयवसमुदायोभयशक्तिकमेकजातीयार्थप्रतिपादकं योगरूढं यथा पंकजादिपदम् अवयवशक्त्या पंकजत्वेन रूपेण कमलमेव बोधयति । समुदायशक्त्या च कमलत्वेन रूपेण।अत एव समुदायशक्तिरावश्यकी। यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधकं यौगिकरूढं यथोद्भिज्जादिपदं तच्च योगेन तरुगुल्मादिकं बोधयति रूढ्या उद्भिज्जश्चाध्व-

रेप्रसिद्धः शक्तिरिव पदस्य लक्षणापि वृत्तिः। इति पदनि॰ अथ केयं लक्षणा शक्यसंबन्धो लक्षणा वर्त्तते च गङ्गायां घोष इत्यत्र गङ्गापदशक्यः प्रवाहसंबन्धस्तीरे लक्षणाबीजं तु तात्पर्यानुपपत्तिः। अत एव प्रवाहे घोषतात्पर्यानुपपत्तेस्तीरे लक्षणा। तात्पर्यं तु वक्तुरिच्छा वक्ता चाभिसंधाययिता तेन न मौनिवाक्येऽव्याप्तिः। सा च लक्षणा त्रिधा। जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति। यत्र वाच्यार्थस्य नान्वयः तत्राद्या। यथा गङ्गायां घोषः मञ्चाः क्रोशन्तीत्यादौ। यत्र वाच्यस्यार्थस्याप्यन्वयस्तत्र द्वितीया। यथा छत्रिणो यान्तीत्यादौ अत्र छत्रिणस्तदितरेषां च गमनान्वयः। यत्र वाच्यैकदेशबाधेनैकदेशान्वयस्तत्र तृतीया यथा सोऽयं देवदत्त इत्यादौ। अत्र तद्देशकालविशिष्टस्य बाधः। तत्पुरुषे, राजपुरुष इत्यत्र राजपदस्य राजसंबन्धिनि लक्षणा। बहुव्रीहावपि लक्षणा। यथा चित्रगुरित्यत्र गोपदस्य गोस्वामिनि लक्षणा चित्रपदं तात्पर्यग्राहकम्। द्वन्द्वे धवखदिरौ छिन्धीत्यत्र धवखदिरपदयोस्तदर्थे प्रकारतयाभासमानद्विवचनार्थद्वित्वे लक्षणा। कर्मधारये तु नीलोत्पलमित्यादौ न लक्षणा। निषादस्थपतिं याजयेदित्यत्रापि कर्मधारये न लक्षणा वेदबोधितयाजनानुपपत्त्या यागोपयुक्तवेदस्याधिकारकल्पनात्। स्त्रीशूद्रौ नाधीयातामिति वेदस्य निषादातिरिक्तस्त्रीशूद्रपरत्वात् तस्य सामान्यवचनत्वात्। दध्यानयेत्यत्र द्वितीयालोपस्थले दधिपदस्य दधिकर्मत्वे लक्षणा घटो न पट इत्यत्राभावार्थकनञो घटभिन्ने लक्षणा। घटं जानामीत्यादावाख्यातस्याश्रये लक्षणा। रथो गच्छतीत्यादावाख्यातस्य व्यापारे लक्षणा। प्रजयतीत्यादौ जयार्थकधातोः प्रकृष्टजये लक्षणा। उपसर्गस्तु तात्पर्यग्राहक इति संक्षेपः।

गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शुभाः।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्।

इत्यत्र त्वद्गमनान्मत्प्राणवियोगो भविष्यतीति बोधाद्व्यञ्जनाख्य-

वृत्त्यन्तरमैच्छन्नालंकारिकाः।तन्न।लक्षणायां तस्या अन्तरभावात्। अथाग्निर्माणवक इत्यत्र माणवकाग्निसादृश्यबोधाद्गौणीवृत्त्यन्तरमेवेति मैवं मंस्थाः। तस्या लक्ष्यमाणगुणसंबन्धात्मकत्वेन लक्षणानतिरेकात्।इतिलक्षणा।।ननु वृत्तिग्रह एव शाब्दहेतुस्त-

आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानाहेतुः । पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा ।

दा गौरश्व इति वाक्यादपि शाब्दापत्तिरत आह आकांक्षेति। अत्र चकारेण तात्पर्यग्रहः । तथाचाकांक्षाज्ञानं योग्यताज्ञानं सन्निधिज्ञानं तात्पर्यज्ञानं च शाब्दहेतुरित्यर्थः।तेनाकांक्षादिविपर्ययेण शाब्दविपर्ययेऽपि न क्षतिः । आकांक्षां व्युत्पादयति पदस्येति घटादिलक्षणनामपदस्य पदान्तरं विभक्तिपदं तस्य व्यतिरेकोऽभावस्तत्प्रयुक्तं तत्प्रयोज्यमन्वयाननुभावकत्वं शाब्दबोधानुपधायकत्वमाकांक्षेत्यर्थः । एवं धातुपदाख्यातपदयोर्गामानयेत्यादिसुबंततिङन्तयोर्द्रष्टव्यम्।इत्याकांक्षा। योग्यता-

अर्थाबाधो योग्यता।पदानामविलम्बेनोच्चारणं सन्निधिः। आकांक्षादिरहितं वाक्यमप्रमाणं यथा गौरश्वः पुरुषो हस्तीति न प्रमाणमाकांक्षाविरहात् । अग्निना सिञ्चेदिति न प्रमाणं योग्यताविरहात्। प्रहरे प्रहरे असहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात् ।

माह अर्थेति। पयसा सिंचतीत्यत्र पयसि सेककरणत्वस्याबा-

धितत्वात्तद्योग्यम्।इति **योग्यतानि०** सन्निधिं व्युत्पादयति **पदानामिति** अविलंबेन पदोपस्थितिः सन्निधिः क्वचिदुच्चारणं तदुपयोगीति तात्पर्यं तेन मौनिश्लोकादौ तदभावेऽपि न शंकापङ्ककलंकावकाशः। **इति सन्निधिः**। अत्र वैयाकरणाः। अविलंबेन पदोपस्थितिर्न संपद्यते तत्कारणीभूतपदानुभवजनितसंस्कारस्यायोगात् वर्णानामाशुतरविनाशित्वेन पदस्यैवाप्रसिद्धेः सुतरां तदनुभवस्यापि यदि स्फोटात्मकपदं स्वीक्रियते तदा प्रविष्टमेवास्माकं मतमित्याहुस्तन्न, तद्वर्णानुभवजनितसंस्कारकूटादेव सहकारिणो बलात् खलेकपोतकन्यायेन समूहालंबनात्मकपदस्मरणसामञ्जस्ये स्फोटस्याकिंचित्करत्वात्। **इति स्फोट०** सैन्धवमानयेत्यादौ तात्पर्यज्ञानादेव क्वचिल्लवणस्य क्वचिदश्वस्य बोधात्तस्यापि कारणत्वं संजाघटीति नानार्थानुरोधात्प्रकरणादिकम् तात्पर्यग्राहकं द्वारमित्यादौ पिधेहीति शब्दज्ञानादेव शाब्दबोधः अतः शब्दाध्याहार एव युक्तः नतु पिधानरूपार्थाध्याहारः पदजन्यपदार्थोपस्थितेरेव बीजत्वात् इतरथा घटः कर्मत्वमानयनं कृतिरित्यादितोऽपि तदापत्तेः। **इति तात्पर्यनिर्णयः**। आकांक्षादिशून्यवाक्यस्यागमप्रमाणत्वं निषेधयति **तथाचेति**। आकांक्षादिकं शाब्दहेतुरित्युक्तं चेत्यर्थः अनाकांक्षाद्युदाहरति **यथा गौरश्व** इति वाक्यं विभजते **वाक्यमिति**। वेदः पौरुषेयो वाक्यत्वात् भारतादिवदित्यनुमानात्तत्सिद्धिर्बोध्या। ननु स्मर्यमाणकर्तृत्वमुपाधिस्तस्य भारतादौ साध्यव्यापकत्वात् वेदे साधनाव्यापकत्वाच्चेति चेन्न, वेदेऽपि तस्य सत्त्वात् अत एव ब्रह्मा वेदकर्त्तेत्यद्यापि किंवदन्ती। **सर्वमेवेति** अबाध्यं वाक्यं सर्वमेवेत्यर्थः। तेनात्मा वै जायते पुत्र इति वेदस्याप्रामाण्येऽपि न क्षतिः। स्मृतिपुराणेतिहाससदाचाराणां वेदमूलकत्वेन प्रामाण्यम्। तन्मूलवेदानामिदानीमनु-

पलभ्यत्वेन शाखा काचिदुच्छिन्नैवेति कल्प्यते। केचित्तु यत्र वेदमूलकत्वं दृश्यते तस्यैव प्रामाण्यमन्यथास्मदादिकल्पितवाक्यानामपि तदापत्तेः। नच यत्र ऋषिप्रणीतं तत्र प्रामाण्यं, बृहस्पतिप्रणीतनास्तिकसूत्रस्यापि तदापत्तेरित्याहुः। लौकिकं तु आप्तोक्तं प्रमाणम्, अन्यदप्रमाणं, तर्हि बृहस्पतेराप्तत्वे कथं तदुक्तमप्रमाणं, अत आह यत् धर्मबुद्ध्या उक्तं तत्रैव प्रामाण्यम्। इति वाक्यविभागः। नन्वेतावता शाब्दसामग्री प्रपञ्चिता प्रमाविभाजकवाक्ये शाब्दस्याप्युद्दिष्टत्वेन तत्कुतो न प्रदर्शितमत

वाक्यं द्विविधं वैदिकं लौकिकञ्च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकन्तु आप्तोक्तम्प्रमाणं—अन्यदप्रमाणम् वाक्यार्थज्ञानं शाब्दज्ञानं तत्करणंशब्दः। इति यथार्थानुभवो निरूपितः॥

आह वाक्यार्थेति। शाब्दत्वं च शब्दात् प्रत्येमीत्यनुभवसिद्धा जातिः। शाब्दबोधक्रमो यथा चैत्रो ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमनानुकूलवर्त्तमानकृतिमानिति बोधः। द्वितीयायाः कर्मत्वमर्थः धातोर्गमनमनुकूलत्वं संसर्गमर्यादया भासते लटो वर्त्तमानत्वमाख्यातस्य कृतिस्तत्संबन्धः संसर्गमर्यादया भासते। रथो गच्छतीत्यत्र गमनानुकूलव्यापारवान् रथ इति बोधः। स्नात्वा गच्छतीत्यत्र गमनप्रागभावावच्छिन्नकालीनस्नानकर्ता गमनानुकूलवर्त्तमानकृतिमानिति शाब्दबोधः। क्त्वाप्रत्ययस्य पूर्वकालीनत्वं चार्थः भोक्तुं गच्छतीत्यत्र भोजनप्राग्भावकालीनभोजनविषयकेच्छावान् गच्छतीतिबोधः। चैत्रेण पच्यते तण्डुल इत्यत्र चैत्रवृत्तिकृतिजन्यपाकजन्यफलशाली तण्डुल इति शाब्दबोधः। वृत्तित्वं

संसर्गबललभ्यं जन्यत्वं च संसर्गबललभ्यं धातोः पाकः जन्यत्वं संसर्गबललभ्यं कर्मणः फलमात्मनेपदस्य शालित्वं संसर्गः क्वचिदात्मनेपदार्थो न भासते यथा चैत्रेण सुप्यते इत्यत्र चैत्रवृत्तिकृतिजन्यः स्वाप इति बोधः। चैत्रः पक्ष्यतीत्यत्र वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकपाकजनककृतिमान् चैत्र इति बोधः। गामानयेत्यत्र गोकर्मकमदिच्छाविषयानयनानुकूलकृतिमांस्त्वमिति बोधः।ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र कृतिसाध्यबलवदनिष्टाऽजनकेष्टसाधनज्योतिष्टोमनामकयागकः स्वर्गकाम इत्यर्थः।एवमेव सर्वत्र प्रथमान्तमुख्यविशेष्यकः शाब्दबोधो ज्ञेयः।वैयाकरणास्तु धात्वर्थमुख्यविशेष्यक एव शाब्दबोधः। यथा चैत्रः पचति तण्डुलमित्यत्र तण्डुलनिष्ठविक्लित्त्यनुकूलश्चैत्रकर्तृकपाक इति बोध इत्याहुः। सर्वत्र दुष्टाः सन्त्येवेत्यत्र क्रियायुक्तैवकारस्यात्यन्तायोगव्यवच्छेदोर्थः। शंखः पाण्डुर एवेत्यत्र विशेषणयुक्तस्यैवकारस्यायोगव्यवच्छेदोर्थः।कर्ण एव दातेत्यत्र विशेष्ययुक्तैवकारस्यान्ययोगव्यवच्छेदोऽर्थः। इति संक्षेपः। इदमपि बोध्यम् लटोवर्त्तमानत्वम्। लिटो भूतानद्यतनपरोक्षत्वम्। लुटो भविष्यानद्यतनत्वम्। लृटो भविष्यत्वम्।लोटोवक्त्रिच्छाविषयत्वम्। लङो भूतानद्यतनत्वम्। लिङ् द्विधा विधिलिङाशीर्लिङ् च। तत्र विधिलिङः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वम्। आशीर्लिङो वक्त्रिच्छाविषयत्वम्। लुङो भूतत्वम्। लृङोऽतीतत्वं भविष्यत्त्वं चेति।इतिशाब्दबोधनिर्णयः।शब्दमुपसंहरति तत्करणमिति। सोऽयं शब्दस्त्रिविधः।विधिमंत्रार्थवादभेदात्।तत्राद्यो विध्यभिधायकप्रत्ययघटितं वाक्यम्।स च प्रत्ययो लिङ्लेट्लोट्तव्यकृत्प्रत्ययरूपः।भवति हि ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यं तथा अत्र लिङेव तादृशप्रत्ययः विध्यभिधायकेत्य-

त्राभिधेयविधिर्ज्ञेयः स च प्रयत्नजनकचिकीर्षाजनकज्ञानविषयः कृतिसाध्येष्टसाधनत्वमेव सः इदमेव लिङर्थः विध्यर्थ इत्यप्युच्यते भवति च यागनिष्ठं तत् यागो मत्कृतिसाध्यो मदिष्टसाधनं चेति ज्ञानविषयः जानातीच्छति यतते इति नियमात् । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिकाम्यस्थलेऽहरहः संध्यामुपासीत यावज्जीवमग्निहोत्रं जुहुयादित्यादिनित्यस्थले चिकीर्षाद्वारा कृतिसाध्येष्टसाधनताज्ञानं प्रवृत्तिं प्रति कारणं नित्येपि संध्यावन्दनादौ प्रत्यवायपरिहारादिकमिष्टं कल्प्यते । न कलञ्जं भक्षयेदित्यादौ नञा विध्यर्थाभावो बोध्यते । अत्र प्राभाकराः । कार्यत्वं विध्यर्थः प्रवृत्तिं प्रति कृतिसाध्यताज्ञानं हेतुः । तेन कृत्यसाध्ये न प्रवृत्तिः । ननु विषभक्षणादौ प्रवृत्तिप्रसंग इति चेत्, तदनुयायिनः इष्टसाधनतालिङ्गककृतिसाध्यतानुमितिरिष्टसाधनताज्ञानकालीनकृतिसाध्यताज्ञानं वा काम्यस्थले प्रवर्त्तकमतो नोक्तदोषः। नित्यस्थले चाहमिदानींतनकृतिसाध्यसंध्यावन्दनको ब्राह्मणत्वे सति विहितसंध्याकालीनशौचादिमत्त्वादिति शौचादिमत्त्वप्रतिसंधानजन्यकृतिसाध्यताज्ञानमिति समादधते । अथाननुगम इति चेत्स्वविशेषणवत्ताप्रतिसंधानजन्यत्वमेव कृतिसाध्यताज्ञानेऽनुगतम् । एवं पुरुषस्तत्र काम्ये इच्छैव विशेषणं नित्ये शौचादिकमेवेति प्रलपन्ति । तन्न । अलघीयस्त्वात् । इति विधिसामान्यनिर्णयः । स त्रिधा । अपूर्वविधिनियमविधिपरिसंख्याविधिभेदात् । तत्रात्यन्ताप्राप्तौ विधिराद्यः। यथा स्वर्गकामो यजेतेत्यादौ । अत्र यजनस्याप्राप्तत्वात् । यत्रोभयोः प्राप्तावेको नियम्यते तत्र द्वितीयः । यथा व्रीहीनवहन्तीति । अत्र व्रीहिषु नखविदलनमुसलावहननयोः प्राप्तौ मुसलावहननमेव नियम्यते । सर्वत्र प्राप्तस्य क्वचिद्विधिस्तृतीयः । यथा पञ्चपञ्चनखा भक्ष्या इत्यत्र सर्वेषां पञ्चनखानां भक्षणे प्राप्ते पञ्चैव पञ्चनखा

भक्ष्या इति विधीयते। शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चम इति पञ्चनखा ज्ञेयाः। इति विधिविशेषनिर्णयः। अर्थवाद-स्त्रिधा। गुणवादोऽनुवादो भूतार्थवादश्चेति। तत्राद्यो यथा। आ-दित्यो यूपो यजमानः प्रस्तर इति प्रमाणान्तरेण निर्णीतार्थस्य ज्ञापकोऽनुवादः। यथाग्निर्हिमस्य भेषजमिति। तत्कालेऽपि त-द्गुणज्ञापको भूतार्थवादः। यथा जरायामप्ययं शूरः। इत्यर्थवादः। मन्त्रस्त्वापः पुनन्त्वित्यादि। इति मन्त्रनिर्णयः। ननु शब्दो न प्रमा-णान्तरं संसर्गज्ञानं त्वनुमानादेव गृह्यते तथाहि गामानयेत्यादि-पदानि स्मारितार्थसंसर्गवन्ति आकांक्षादिमत्पदकदम्बत्वात् मद्-द्वाक्यवदिति चेन्न, अनुमितिविलक्षणस्य शब्दात्प्रत्येमीत्यनुभ-वसाक्षिकशाब्दस्यापलपितुमशक्यत्वात्। अर्थापत्तिरपि न प्रमा-णान्तरम्। तथाहि। पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा दिवाऽभुञ्जानस्य पीनत्वं रात्रिभोजनं विनानुपपन्नमित्य-नुपपत्तिज्ञानं भवति इयमेवार्थापत्तिस्ततो देवदत्तो रात्रौ भुंक्ते इत्यनुभवो जायते देवदत्तो रात्रिभोजी दिवाऽभुञ्जानत्वे सति पीनत्वादिति केवलव्यतिरेक्यनुमानेनैव तत्सिद्धौ तस्या अकिं-चित्करत्वात्। अनुपलब्धेः प्रमाणत्वं निराकृतमेव प्राक्। संभवो-ऽपि न प्रमाणान्तरम्। तथाहि। स द्विविधः। संभावनात्मको निर्ण-यात्मकश्चेति। तत्रादिमो न प्रमाणम्। यथा ब्राह्मणेषु चतुर्दशवि-द्याभिज्ञत्वं संभवतीति। चतुर्दशविद्याश्च

ऋग्वेदश्च यजुर्वेदः सामवेदो ह्यथर्वणः।
शिक्षाकल्पो व्याकरणं ज्योतिश्छन्दो निरुक्तयः॥
मीमांसा तर्कशास्त्रं च पुराणं धर्मशास्त्रकम्।
विद्याश्चतुर्दशैताश्च पुरुषार्थनिदानकाः॥"

इति वेदान्तस्य मीमांसायामन्तर्भावः वैशेषिकस्य तर्के सां-

स्यपातञ्जलपाशुपतवैष्णवरामायणभारतादीनां धर्मशास्त्रे । पुराणं च ब्राह्मपाद्मस्कान्दमार्कण्डेयशैववैष्णवगाणेशभागवताग्नेयभविष्यब्रह्मवैवर्त्तलैङ्गवाराहकौर्ममात्स्यगारुडब्रह्माण्डभेदादष्टादशधा । वासिष्ठलैङ्गनारसिंहनन्दीयनारदीयवामनीयहंसतत्वसारदौर्वासशैवधार्मिककापिलमानववारुणरेणुकवायवीयकालीयमाहेश्वरपाराशरमारीचभार्गवादिभेदादुपपुराणानि बहुविधानि । मनुयाज्ञवल्क्यविष्णुयमांगिरसवसिष्ठदत्तसंवर्त्तशातातपपाराशरगौतमशंखलिखितहारीतापस्तम्बोशनसकात्यायनद्राह्यायनबृहस्पतिदेवलपैठीनसिप्रभृतिकृतानि बहूनि धर्मशास्त्राणि तस्माच्चतुर्दशैव विद्याः।ननु आयुर्वेदधनुर्वेदगान्धर्ववेदार्थशास्त्रभेदादुपवेदचतुष्टयमप्यस्ति, कामशास्त्रस्यायुर्वेदान्तर्भावः नीतिशास्त्रशिल्पिशास्त्राश्वशास्त्रसूपकारशास्त्रचतुःषष्टिकलाशास्त्राणामर्थशास्त्रेन्तर्भावः तस्मादष्टादशैव विद्येति चेत्स्यादेव शते पञ्चाशदिति निर्णयात्मकसंभवोऽनुमानान्तर्भूतः । इह वटे यक्षस्तिष्ठतीत्यैतिह्यमपि न प्रमाणान्तरम् किंत्वज्ञातमूलवक्तृकः शब्दः । चेष्टापि न प्रमाणान्तरं किंत्वनुमानप्रयोजिकैव।तस्माच्चत्वार्येव प्रमाणानीति सिद्धम् । एतेनोपलब्धिकादिप्रमाप्यप्रसिद्धा इति बोध्यम् । इति शब्दखण्डः।ज्ञाननिष्ठं तद्वतितत्प्रकारकत्वात्मकं प्रामाण्यं स्वतो ग्राह्यं परतो वेति विप्रतिपत्तिः। अत्र ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वमिदमेव स्वतो ग्राह्यमिति किंवदन्ती।अस्यार्थः।ज्ञानप्रामाण्यं ज्ञाननिष्ठाप्रामाण्याग्राहिका यावतीज्ञानग्राहिकानुव्यवसायादिरूपा सामग्री तद्ग्राह्यमिति।इदमेव ज्ञप्तौ स्वतस्त्वमित्युच्यते। यत्र गुञ्जापुञ्जेऽयं वह्निरिति भ्रमः पश्चादिदं ज्ञानमप्रमेति प्रमा ततो द्वितीयज्ञानं प्रमेति प्रमा तत्र तृतीयज्ञानग्राह्यत्वस्यानुव्यवसायगतप्रामाण्ये सत्त्वेऽपि तृतीयज्ञानस्य व्यवसायनिष्ठाप्रा-

ण्यग्राहकत्वेनाप्रामाण्याग्राहकत्वाभावात्स्वतस्त्वं न संजाघटीति अतस्तदिति। प्रामाण्याधार एव तत्पदार्थः। यत्रायं घट इति प्रमानन्तरमिदं ज्ञानमप्रमेत्यप्रमा तत्र धूलीपटलेऽयं धूम इति ज्ञानप्रकारत्वस्य धूलीपटलत्वेऽसत्त्ववत्स्वतो ग्राह्यत्वस्य प्रामाण्येऽसत्वाद्बाधः अतोऽप्रामाण्याग्राहकेति। सिद्धसाधनवारणाय यावदिति। नन्वनुव्यवसायेन कथं प्रामाण्यं गृह्यते इति चेत् घटमहं जानामीत्यनुव्यवसायो घटं घटत्वं समवायं च विषयीकुर्वन्नात्मनि प्रकारीभूतघटमात्मानं तत्संबन्धीभूतव्यवसायं विषयीकरोति एवं सति पुरोवर्त्तिप्रकारसंबन्धस्यैव प्रमापदार्थत्वेन स्वत एव प्रामाण्यं गृह्णातीति मुरारिमिश्राः। अनुव्यवसायात्मकमेव सर्वं ज्ञानं तच्च स्वप्रकाशमिति मातृमेयविषयत्वात्त्रिपुटीत्युच्यते स्वप्रकाशसामर्थ्यादेव स्वात्मानमिव स्ववृत्तिप्रामाण्यं स्वत एव गृह्णातीति प्राभाकराः। अयं घट इति ज्ञानानन्तरं घटे ज्ञाततानाम फलं भवति। ततो ज्ञातो घट इति तत्प्रत्यक्षम्। पश्चात्तया ज्ञानमात्रस्यातीन्द्रियत्वात् ज्ञानं तन्निष्ठप्रामाण्यं चाहं घटत्वप्रकारकज्ञानवान् घटत्वप्रकारकज्ञाततावत्त्वादित्यनुमीयते तस्मात्स्वत एव प्रामाण्यं गृह्यते। स्वतो ग्राह्यत्वं च ज्ञानग्राहकातिरिक्तानपेक्षत्वमिति भट्टाः। तन्नेति गौतमीयाः। एषामयमाशयः इदं जलमिति ज्ञानानन्तरमनभ्यासदशायां ममोत्पन्नं ज्ञानं प्रमा नवेति संशयो न स्यादिति। तत्र पूर्वं प्रामाण्यस्य निश्चितत्वात्। स्वप्रकाशत्वमपि दुर्वचम्, चाक्षुषादिना स्वात्मनो विषयीकर्त्तुमशक्यत्वात्, ज्ञानविषयतातिरिक्तज्ञाततायां मानाभावादतो निषेधकोटिरेव बलीयसीति कृतं तर्ककर्कशविचारभारधारणेन शिशूनाम्। अथ कथं परतः प्रामाण्यं गृह्यते इति चेत्, उच्यते प्रथमं जलजलत्वयोर्निर्विकल्पकं तत इदं जलमिति

विशिष्टज्ञानं तत इच्छा ततः प्रवृत्तिस्तदनन्तरं जललाभस्तदनन्तरं पूर्वोत्पन्नं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमेति व्यतिरेकिणा यथा घटज्ञानमित्यन्वयदृष्टान्तस्यापि संभवेनान्वयव्यतिरेकिणा वा प्रामाण्यं निर्धार्यते इति । ज्ञप्तौ परतस्त्वं प्रमाया गुणजन्यत्वादुत्पत्तौ परतस्त्वम् गुणस्य प्रमाऽसाधारणकारणत्वात् यथा प्रत्यक्षे संनिकर्षः अनुमितौ विशिष्टपरामर्शः उपमितौ सादृश्यज्ञानं शाब्दे शब्दज्ञानं एवमप्रामाण्यमपि परतो गृह्यते इदं च मीमांसकानामप्यनुमतम् पुरो वर्तिनि प्रकाराभावस्यानुव्यवसायेनानुपस्थितत्वात् अप्रमायाः पित्तमण्डूकवसांजनचाकचिक्यदूरत्वादिदोषजन्यत्वादुत्पत्तौ परतस्त्वं दोषस्य अप्रमाऽसाधारणकारणत्वादित्यास्तां विस्तरः । इति **प्रामाण्यवादः** ॥ अयथार्थानुभवं

अयथार्थानुभवस्त्रिविधः । संशयविपर्ययतर्कभेदात् । एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वेति । मिथ्याज्ञानं विपर्ययः । यथा शुक्ताविदं रजतमिति ॥ व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति । स्मृतिरपि द्विधा। यथार्थायथार्था च । प्रमाजन्या यथार्था अप्रमाजन्याऽयथार्था । सर्वेषामनुकूलतया वेदनीयं सुखम् । प्रतिकूलतया वेदनीयं दुःखम् । इच्छा कामः ।

विभजते अयथार्थाऽनुभव इति संशयं लक्षयति एकस्मिन्निति एकस्मिन्धर्मिणि एकस्मिन्नेव पुरोवर्त्तिपदार्थे विरुद्धा व्यधिकरणा ये नानाधर्माः स्थाणुत्वपुरुषत्वादयः तेषां च वैशिष्ट्यं संबन्धस्तदवगाहि ज्ञानं संशय इत्यर्थः। घटपटाविति समूहालंबनज्ञानस्य घटत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसंगवारणायैकस्मिन्निति । पटः पृथिवीति ज्ञानस्य एकस्मिन् धर्मिणि पटे पटत्वपृथिवीत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिरतो विरुद्धेति पटत्वविरुद्धघटत्ववान् घट इति ज्ञानेऽतिप्रसक्तिस्तद्वारणाय नानेति। उदाहरति यथेति। स त्रिविधः साधारणधर्मधीजन्योऽसाधारणधर्मधीजन्यो विप्रतिपत्तिजन्यश्चेति। विशेषादर्शनं कोटिद्वयस्मरणं संशयमात्रे हेतुः तत्राद्यस्तूपदर्शित एव उच्चैस्तरत्वं तत्र साधारणधर्मः स्थाणुत्वनिश्चायकवक्रकोटरादिमत्वं पुरुषत्वनिश्चायककरादिमत्वं वा विशेषः स्थाणुत्वं पुरुषत्वं च कोटिद्वयम्। द्वितीयो यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दमात्रवृत्तीति ज्ञाने शब्दो नित्यो न वेति संशयः। तृतीयो यथा प्रामाण्यं स्वतो ग्राह्यं परतो ग्राह्यं वेति संशयः। इति संशयनिर्णयः। विपर्ययं लक्षयति मिथ्येति विपर्ययः यथा शुक्ताविदं रजतमिति इति विपर्ययः। तर्कं लक्षयति व्याप्यारोपेणेति । वह्न्यभावो व्याप्यः धूमाभावो व्यापकः उदाहरति यथेति। यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथग्विभागोऽनुचितस्तथापि प्रमाणानुग्राहकत्वात्स उचित इति बोध्यम् । स्वप्नस्तु पुरीतद्बहिर्देशयोः संधौ मनसि स्थितेऽदृष्टविशेषेण चिंताविशेषेण धातुदोषेण वा जन्यते स च मानसविपर्ययेऽन्तर्भूतः । इदं किंचिदित्यनध्यवसायश्च विशेषादर्शनेन जन्यते स च विपर्यय एव। इति तर्कनिर्णयः। इत्ययथार्थानुभवः। स्मृतिं विभजते स्मृति-

लम् । अत्रानुभव उपेक्षाभिन्नो ग्राह्यः। इदं तु बोध्यं उद्बुद्धसंस्कार एव स्मृत्युपधायकः। उद्बोधकं च चिंतादिकम् ।तदुक्तम् "सदृशादृष्टचिंताद्याः स्मृतिबीजस्य बोधकाः" इति। अत्र नव्याः संस्कारं प्रति स्मरणमपि कारणम् । आश्रयमाह **आत्ममात्रवृत्तिरिति** । स्थितिस्थापकं निरूपयति **अन्यथेति** । पृथिवीमात्रसमवेतसमवेतसंस्कारत्वव्याप्यजातिमत्त्वं तल्लक्षणं बोध्यं । आश्रयमाह **कटादीति** । आदिना कार्मुकादेः परिग्रहः। **इति संस्कारः**।

अथ गुणानां साधर्म्यवैधर्म्यप्रक्रिया । गुणलक्षणं तु प्रागभिहितमेव । रूपादिचतुष्टयसांसिद्धिकद्रवत्वस्नेहादिदशभावनानां विशेषगुणत्वम्। तच्च पृथिवीसमवेतसमवेतद्वींद्रियग्राह्यसांसिद्धिकद्रवत्वभावनान्यत्वविशिष्टगुणत्वापरजात्यनधिकरणत्वे सति गुरुत्वान्यगुणम् । संख्याद्यष्टनैमित्तिकद्रवत्वस्थितिस्थापकवेगानां सामान्यगुणत्वम् । रूपादिचतुष्टयपरत्वापरत्वद्रवत्वस्नेहवेगानां मूर्त्तवृत्तिगुणत्वम्। शब्दादिदशभावानाममूर्त्तवृत्तिगुणत्वम्। संख्यादिपंचानां मूर्त्तामूर्तोभयवृत्तिगुणत्वम् । एकत्वभिन्नसंख्यैकपृथक्त्वभिन्नपृथक्त्वसंयोगविभागानामनेकवृत्तिगुणत्वम् । तदन्येषां गुणानामेकैकवृत्तिगुणत्वम् । रूपादिचतुष्टयशब्दानां बाह्यैकैकेंद्रियग्राह्यगुणत्वं संख्यादिसप्तद्रवत्वस्नेहवेगानां द्वींद्रियग्राह्यगुणत्वं बुद्ध्यादिषट्कानामान्तरेन्द्रियग्राह्यगुणत्वम् गुरुत्वधर्माधर्मस्थितिस्थापकभावनानामतीन्द्रियगुणत्वम्। अपाकप्रभवरूपादिचतुष्टयमध्यमपरिमाणैकपृथक्त्वगुरुत्वसांसिद्धिकद्रवत्वस्नेहवेगस्थितिस्थापकानां कारणगुणपूर्वकत्वम्। जन्यद्रव्यावृत्तिविशेषगुणानामकारणगुणपूर्वकत्वम् । संयोगविभागवेगानां कर्मासमवायिकारणकत्वं कारणगुणासमवायिकारणकत्वं च संयोगविभागशब्दाद्यष्टभावनानामव्याप्यवृत्तिगुणत्वम्। बुद्धीच्छाप्रयत्नद्वेषभावनानां सविषयत्वं गंधसंयोगादिचतुष्टयश-

द्धसुखदुःखद्वेषधर्माधर्मसंस्काराणामनित्यगुणत्वं तदितरगुणानां नित्यगुणत्वम्। वैधर्म्यं पूर्ववद्बोध्यम्। इति गुणसाधर्म्यवैधर्म्यम्। क्रमप्राप्तं कर्मणः स्वरूपमाह चलनात्मकेति। तल्लक्षण-

ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम् पृथिव्यादिचतुष्टयमनोमात्रवृत्ति। नित्यमेकमनेकानुगतं सामान्यं द्रव्यगुणकर्मवृत्ति। तद्द्विविधम्। परापरभेदात्परं सत्ता अपरंद्रव्यत्वादि। नित्यद्रव्यवृत्तयो व्यावर्त्तका विशेषाः। नित्यसंबन्धः समवायः। अयुतसिद्धवृत्ति। ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ।

मुदीरतमेव प्राक्। उत्क्षेपणं लक्षयति ऊर्ध्वदेशेति। ऊर्ध्वदेशस्य हस्तेन यः संयोगस्तस्यासमवायिकारणमुत्क्षेपणमित्यर्थः। एवमग्रेऽपि। ननु भ्रमणरेचनस्यन्दनतिर्यग्गमनज्वलनानामतिरिक्तत्वेन कुतो नोक्तान्यत आह अन्यदिति। इति कर्मनिर्णयः। सामान्यं निरूपयति नित्येति। आश्रयमाह द्रव्येति। इति सामान्यनिर्णयः। विशेषं निरूपयति नित्येति। स्वतो व्यावर्त्तका इत्यर्थः। इति विशेषनिर्णयः। समवायं निरूपयति नित्यइति। स्थानमाह अयुतसिद्धेति। नन्वयुतसिद्धपदेन किं ग्राह्यमत आह ययोरिति। उक्तं च। तावेवायुतसिद्धौ द्वौ वि-

ज्ञातव्यौ ययोर्द्वयोरविनश्यदेकमपराश्रितमेवावतिष्ठते" इति कपालघटयोर्मध्ये एको घटोऽविनश्यन्नपरं कपालमाश्रित एवावतिष्ठतेऽतस्तावयुतसिद्धावित्यर्थः । विनश्यदवस्थस्यापरानाश्रितत्वेनायुतसिद्धत्वं न स्यात् अत उक्तमविनश्यदिति । उदाह-

अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति । अनादिः सान्तः प्रागभावः उत्पत्तेः पूर्वं कार्यस्य । सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं कार्यस्य । त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः यथा भूतले घटो नास्तीति । तादात्म्यसंबन्धावच्छिन्नप्रतियोगिको ऽन्योन्याभावः यथा घटः पटो न भवतीति । सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम् ।

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

इति महामहोपाध्याय श्रीअन्नम्भट्टविरचितस्तर्कसंग्रहः समाप्तः ॥

रति अवयवेति । इति समवायनिरूपणम् । प्रागभावं लक्षयति अनादिरिति । घटादिवारणाय प्रथमदलं परमाणुवा-

रणाय द्वितीयदलम्। ननु प्रागभावः कस्मिन्कालेऽस्ति, इत्याह उत्पत्तेरिति कार्योत्पत्तेःप्राक् स्वप्रतियोगिसमवायिकारणे वर्त्तत इत्यर्थः। अथ प्रागभावः कथं सिद्ध्यतीति चेत्सत्यामपि सामग्र्यामुत्पन्नस्य पुनरुत्पत्तिसाध्वसेन तत्सिद्धिः। इह कपाले घटो भविष्यतीति प्रतीतिरपि मानम्। **इति प्रागभावः।** ध्वंसं लक्षयति **सादिरिति।** कार्योत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणवृत्तिरित्यर्थः। स च ध्वस्त इति प्रत्ययविषयः। **इति ध्वंसः।** अत्यंताभावं लक्षयति **त्रैकालिकेति।** त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिताकोऽत्यंताभाव इत्यर्थः। ध्वंसप्रागभाववारणाय त्रैकालिकेति। भेदवारणाय संसर्गेत्यादि। उदाहरति **यथेति।** स द्विविधः। एकपर्याप्तधर्मावच्छिन्नप्रतियोगिताकोऽनेकपर्याप्तधर्मावच्छिन्नप्रतियोगिताकश्च। तत्राद्यो धर्मो घटत्वादिः। द्वितीय उभयत्वादिः। अयमेव व्यासज्यवृत्तिधर्म इत्युच्यते। सामयिकाभावो नांगीक्रियते। घटवति भूतले घटाभावस्य सत्त्वेऽपि सामग्र्यभावात्तत्प्रतीत्यभावः। सा च सामग्रीभूतलघटसंयोगप्रागभावध्वंसान्यतरत्तादृशाप्रतीतिकालीनभूतलादिकमित्यप्रतियोगितावच्छेदकैक्येऽपि एकप्रतियोगिकानां तेषां संसर्गभेदेन बहुत्वम्। विशेषाभावसमुदायात्सामान्याभावोऽतिरिक्त एव। अनवस्थासाध्वसेन द्वितीयाभावो भावस्वरूप एवेति संप्रदायविदः भावस्य निषेधमुखप्रमाणगम्यत्वासंभवेन तृतीयाभावः प्रथमाभावस्वरूप इति नवीना इत्यास्तां विस्तरः। **इत्यत्यन्ताभावः।** अन्योन्याभावं लक्षयति **तादात्म्येति।** **इत्यभावः।**

अथ "प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति न्यायस्य प्रथमसूत्रे षोडशपदार्थानां

प्रतिपादितत्वात्कथं सप्तपदार्था एव निरूपिता अत आह सर्वेषामपीति । तथा च तेषां साक्षान्मोक्षोपयोगित्वेन तेषां विभागः इत्याकरेष्वपि प्रतिपादितत्वादिति भावः । कथमन्तर्भावः । प्रमाणस्य द्रव्यगुणयोरन्तर्भावः । आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति सूत्रम् । तत्राद्यानां त्रयाणां द्रव्ये चाक्षुषादिविषयरूपादिपञ्चार्थानां गुणे बुद्धेर्गुणे मनसो द्रव्ये धर्माधर्मात्मकप्रवृत्तेर्गुणे रागद्वेषमोहात्मकदोषस्य गुणे प्रेत्यभावो मरणोत्तरं जन्म मरणं च चरमशरीरप्राणसंयोगध्वंसः आद्यशरीरप्राणसंयोगो जन्म तथा च मरणोत्तरतादृशसंयोगरूपस्य तस्य गुणे सुखदुःखसंवेदनात्मकफलस्य गुणे दुःखस्य गुणे अपवर्गस्याभावे स च दुःखध्वंसस्वरूपः संशयस्य गुणे साध्यतया कामनाविषयरूपप्रयोजनस्य यथायथं द्रव्यादौ महानसादिदृष्टांतस्य यथायथं द्रव्यादौ प्रामाणिकत्वेनाभ्युपगतार्थसिद्धांतस्य यथायथं द्रव्यादौ प्रतिज्ञाद्यवयवस्य गुणे तर्कस्य गुणे निर्णयस्य गुणे तत्त्वबुभुत्सोः कथावादस्तस्य गुणे विजिगीषुकथाजल्पस्तस्य गुणे स्वपक्षस्थापनाहीनकथावितंडा तस्या गुणे हेत्वाभासानां यथायथं द्रव्यादौ अभिप्रायांतरेण प्रयुक्तस्यार्थान्तरं परिकल्प्य दूषणाभिधानं छलं तस्य गुणे असदुत्तरं जातिस्तस्या गुणे पराजयहेतुर्निग्रहस्थानम् तच्च प्रतिज्ञाहानिः प्रतिज्ञान्तरम् प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वंतरमर्थान्तरं निरर्थकमपार्थमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभाऽमतानुज्ञाविक्षेपः पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धांतो हेत्वाभासाश्चेति बहुधा एषां यथायथं द्रव्यादौ । ननु मणिसत्त्वे वह्निना दाहानुत्पादाद्दहावनित्यशक्तिरतिरिक्तै-

इति चेन्न, उत्तेजकाभावविशिष्टमण्यभावस्यैव दाहकारणत्वेन तस्यां मानाभावात्। सादृश्यमपि न पदार्थांतरमपि तु तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वम्। शुद्धिरपि नातिरिक्ता किं तु भस्मादिसंयोगसमानकालीनास्पृश्यस्पर्शप्रतियोगिकयावदभावसहितभस्मादिसंयोगध्वंस इति संक्षेपः। इत्यन्तर्भावः पदार्थानाम्। पदार्थज्ञानस्य परप्रयोजनं मोक्ष इत्यामनंति। स च स्वर्गादिरिति मीमांसकाः। नित्यसुखाभिव्यक्तिरिति तदेकदेशिनः। अहंकारनिवृत्तावौदासीन्यमिति सांख्यज्ञाः। ब्रह्मांशिकजीवस्याविद्याप्रभवमिथ्याज्ञाननिवृत्तौ स्वस्वरूपताधिगम इति वेदांतिनः। सारूप्यसालोक्यसामीप्यसायुज्यभेदाच्चतुर्विध इति सगुणोपासकाः। अपराधीनतेति चार्वाकाः। ऊर्ध्वगतिरित्यपि केचित्। तत्सर्वं धीमता चिन्तनीयम्। अपि तु आत्यंतिकैकविंशतिदुःखध्वंसः आत्यंतिकत्वं च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वम्। एकविंशतिदुःखानि च शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखंदुःखंचेति। दुःखानुषंगित्वाच्छरीरादौ गौणं दुःखत्वम्। तथाचात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुतेरात्मज्ञानसाधननिदिध्यासनसाधनमननसाधनत्वं पदार्थज्ञाने संजाघटीति एवं सति तत्त्वज्ञाने जाते शरीरपुत्रादावात्मस्वीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः। तेन दोषाभावः तेन प्रवृत्त्यनुत्पत्तिः ततस्तत्कालीनशरीरेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां प्रारब्धकर्मणां नाशः। ततो जन्माभावः ततो मोक्ष इति क्रमः।

"नित्यनैमित्तकैरेव कुर्वाणो दुरितक्षयम्
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ॥

अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः"

इत्यादि वचनात् । तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेश्च । सगुणोपासनाकाशीमरणादेरपि तत्त्वज्ञानद्वारामुक्तिहेतुत्वम् । अत एव परमेश्वरः काश्यां तारकमुपदिशतीति सारम् । इति मोक्षनिरूपणम् । इतिश्रीसिद्धान्तचन्द्रोदयनामकं तर्कसंग्रहविवरणं समाप्तम्॥

3393

# विक्रीस तयार.

## न्यायग्रन्थाः ।

| | रु. | आ. |
|---|---|---|
| कारिकावलिः—(भाषापरिच्छेदः) .... | ० | २ |
| सैव—(भाषापरिच्छेदः) सिद्धान्तमुक्तावलिसहिता. .... .... .... | ० | ८ |
| सैव—मुक्तावलि दिनकरी-रामरुद्रीस० .... | ४ | ० |
| कारिकावलिः—तथैव रामरुद्रीसहिता .... | ३ | ० |
| सैव—मुक्तावलि-दिनकरीसहिता .... | २ | १० |
| कुसुमाञ्जलिः—सटीकः .... .... | ० | ४ |
| स एव—टीकाद्वयोपेतः .... .... | ४ | ० |
| स एव—सटीकः .... .... .... | १ | १० |
| केवलान्वयिशिरोमणिः—जागदीशीटीकासहितः-फक्किकोत्तरसहितश्च। .... | २ | ४ |
| खण्डनखण्डखाद्यम्—मूलम् .... .... | १ | १० |
| खण्डनखण्डखाद्यम्—सटीकं सटिप्पणं च.... | ६ | १२ |
| गदाधरी-सामान्यनिरुक्तिः .... .... | ० | ११ |
| जागदीशी—पक्षता .... .... | ० | ११ |
| सैव—सटीका .... .... .... | १ | ४ |
| तर्कभाषा—मूलम्.... .... .... | ० | ४ |
| लक्षणावली—मूलम् .... .... | ० | २ |
| लक्षणावली—सटीका .... .... | ० | १३ |

पंडित ज्येष्ठाराम मुकुन्दजी.
नं० ३९३ कालकादेवी रोड, मुं